(७१३)

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥ ९ ००१ ०१
रक्षोहा विश्वचर्षणिर् अभि योनिम् अयोहतम् ।
द्रुणा सधस्थम् आसदत् ॥ ९ ००१ ०२
वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः ।
पर्षि राधो मघोनाम् ॥ ९ ००१ ०३
अभ्य् अर्ष महानां देवानां वीतिम् अन्धसा ।
अभि वाजम् उत श्रवः ॥ ९ ००१ ०४
त्वाम् अच्छा चरामसि तद् इद् अर्थं दिवे-दिवे ।
इन्दो त्वे न आशसः ॥ ९ ००१ ०५
पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ।
वारेण शश्वता तना ॥ ९ ००१ ०६
तम् ईम् अण्वीः समर्य आ गृभ्णन्ति योषणो दश ।
स्वसारः पार्ये दिवि ॥ ९ ००१ ०७
तम् ईं हिन्वन्त्य् अग्रुवो धमन्ति बाकुरं दृतिम् ।
त्रिधातु वारणम् मधु ॥ ९ ००१ ०८
अभी ३ मम् अघ्न्या उत श्रीणन्ति धेनवः शिशुम् ।
सोमम् इन्द्राय पातवे ॥ ९ ००१ ०९
अस्येद् इन्द्रो मदेष्व् आ विश्वा वृत्राणि जिघ्नते ।
शूरो मघा च मंहते ॥ ९ ००१ १०

(७१४)

पवस्व देववीर् अति पवित्रं सोम रंह्या ।
इन्द्रम् इन्दो वृषा विश ॥ ९ ००२ ०१
आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।

आ योनिं धर्णसिः सदः ॥ १ ००२ ०२
अधुक्षत प्रियम् मधु धारा सुतस्य वेधसः ।
अपो वसिष्ट सुक्रतुः ॥ १ ००२ ०३
महान्तं त्वा महीर् अन्व् आपो अर्षन्ति सिन्धवः ।
यद् गोभिर् वासयिष्यसे ॥ १ ००२ ०४
समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
सोमः पवित्रे अस्मयुः ॥ १ ००२ ०५
अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः ।
सं सूर्येण रोचते ॥ १ ००२ ०६
गिरस् त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।
याभिर् मदाय शुम्भसे ॥ १ ००२ ०७
तं त्वा मदाय घृष्वय उलोककृत्नुम् ईमहे ।
तव प्रशस्तयो महीः ॥ १ ००२ ०८
अस्मभ्यम् इन्दव् इन्द्रयुर् मध्वः पवस्व धारया ।
पर्जन्यो वृष्टिमाँ इव ॥ १ ००२ ०९
गोषा इन्दो नृषा असि अश्वसा वाजसा उत ।
आत्मा यज्ञस्य पूर्व्यः ॥ १ ००२ १०

(७१५)

एष देवो अमर्त्यः पर्णवीर् इव दीयति ।
अभि द्रोणान्य् आसदम् ॥ १ ००३ ०१
एष देवो विपा कृतो ऽति ह्वरांसि धावति ।
पवमानो अदाभ्यः ॥ १ ००३ ०२
एष देवो विपन्युभिः पवमान ऋतायुभिः ।
हरिर् वाजाय मृज्यते ॥ १ ००३ ०३
एष विश्वानि वार्या शूरो यन्न् इव सत्वभिः ।
पवमानः सिषासति ॥ १ ००३ ०४

एष देवो रथर्यति पवमानो दशस्यति ।
आविष् कृणोति वग्वनुम् ॥ १ ००३ ०५
एष विप्रैर् अभिष्टुतो ऽपो देवो वि गाहते ।
दधद् रत्नानि दाशुषे ॥ १ ००३ ०६
एष दिवं वि धावति तिरो रजांसि धारया ।
पवमानः कनिक्रदत् ॥ १ ००३ ०७
एष दिवं व्य् आसरत् तिरो रजांस्य् अस्पृतः ।
पवमानः स्वध्वरः ॥ १ ००३ ०८
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ॥ १ ००३ ०९
एष उ स्य पुरुव्रतो जज्ञानो जनयन्न् इषः ।
धारया पवते सुतः ॥ १ ००३ १०

(७१६)
सना च सोम जेषि च पवमान महि श्रवः ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०१
सना ज्योतिः सना स्व१र् विश्वा च सोम सौभगा ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०२
सना दक्षम् उत क्रतुम् अप सोम मृधो जहि ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०३
पवीतारः पुनीतन सोमम् इन्द्राय पातवे ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०४
त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०५
तव क्रत्वा तवोतिभिर् ज्योक् पश्येम सूर्यम् ।
अथा नो वस्यसस् कृधि ॥ १ ००४ ०६
अभ्य् अर्ष स्वायुध सोम द्विबर्हसं रयिम् ।

अथा॑ नो॒ वस्य॑सस् कृधि ॥ ९ ००४ ०७
अ॒भ्य् अ १॒॑ र्षान॑पच्युतो र॒यिं स॒मत्सु॑ सास॒हिः ।
अथा॑ नो॒ वस्य॑सस् कृधि ॥ ९ ००४ ०८
त्वां य॒ज्ञैर् अ॑वीवृध॒न् पव॑मान॒ विध॑र्मणि ।
अथा॑ नो॒ वस्य॑सस् कृधि ॥ ९ ००४ ०९
र॒यिं न॑श् चि॒त्रम् अ॒श्विन॒म् इन्दो॑ वि॒श्वायु॒म् आ भ॑र ।
अथा॑ नो॒ वस्य॑सस् कृधि ॥ ९ ००४ १०

(७१७)
समि॑द्धो वि॒श्वत॒स् पतिः॒ पव॑मानो॒ वि रा॑जति ।
प्री॒णन् वृषा॒ कनि॑क्रदत् ॥ ९ ००५ ०१
तनू॒नपा॒त् पव॑मानः॒ शृङ्गे॒ शिशा॑नो अर्षति ।
अ॒न्तरि॑क्षेण॒ रार॑जत् ॥ ९ ००५ ०२
ई॒ळेन्यः॒ पव॑मानो र॒यिर् वि रा॑जति द्यु॒मान् ।
मधो॒र् धारा॑भि॒र् ओज॑सा ॥ ९ ००५ ०३
ब॒र्हिः प्रा॒चीन॒म् ओज॑सा॒ पव॑मान स्तृ॒णन् हरिः॑ ।
दे॒वेषु॑ दे॒व ई॑यते ॥ ९ ००५ ०४
उद् आतै॑र् जिहते बृ॒हद् द्वारो॑ दे॒वीर् हि॑र॒ण्ययीः॑ ।
पव॑मानेन॒ सुष्टु॑ताः ॥ ९ ००५ ०५
सु॒शि॒ल्पे बृ॑ह॒ती म॒ही पव॑मानो वृषण्यति ।
नक्तो॒षासा॒ न द॑र्श॒ते ॥ ९ ००५ ०६
उ॒भा दे॒वा नृ॒चक्ष॑सा॒ होता॑रा॒ दैव्या॑ हुवे ।
पव॑मान॒ इन्द्रो॒ वृषा॑ ॥ ९ ००५ ०७
भार॑ती॒ पव॑मानस्य॒ सर॑स्व॒तीळा॑ म॒ही ।
इ॒मं नो॑ य॒ज्ञम् आ ग॑मन् ति॒स्रो दे॒वीः सु॒पेश॑सः ॥ ९ ००५ ०८
त्वष्टा॑रम् अग्र॒जां गो॒पाम् पु॑रो॒यावा॑न॒म् आ हु॑वे ।
इन्दु॒र् इन्द्रो॒ वृषा॒ हरिः॒ पव॑मानः प्र॒जाप॑तिः ॥ ९ ००५ ०९

वनस्पतिम् पवमान मध्वा सम् अङ्ग्धि धारया ।
सहस्रवल्शं हरितम् भ्राजमानं हिरण्ययम् ॥ १ ००५ १०
विश्वे देवाः स्वाहाकृतिम् पवमानस्या गत ।
वायुर् बृहस्पतिः सूर्यो ऽग्निर् इन्द्रः सजोषसः ॥ १ ००५ ११

(७१८)

मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
अव्यो वारेष्व् अस्मयुः ॥ १ ००६ ०१
अभि त्यम् मद्यम् मदम् इन्दव् इन्द्र इति क्षर ।
अभि वाजिनो अर्वतः ॥ १ ००६ ०२
अभि त्यम् पूर्व्यम् मदं सुवानो अर्ष पवित्र आ ।
अभि वाजम् उत श्रवः ॥ १ ००६ ०३
अनु द्रप्सास इन्दव आपो न प्रवतासरन् ।
पुनाना इन्द्रम् आशत ॥ १ ००६ ०४
यम् अत्यम् इव वाजिनम् मृजन्ति योषणो दश ।
वने क्रीळन्तम् अत्यविम् ॥ १ ००६ ०५
तं गोभिर् वृषणं रसम् मदाय देववीतये ।
सुतम् भराय सं सृज ॥ १ ००६ ०६
देवो देवाय धारयेन्द्राय पवते सुतः ।
पयो यद् अस्य पीपयत् ॥ १ ००६ ०७
आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः ।
प्रत्नं नि पाति काव्यम् ॥ १ ००६ ०८
एवा पुनान इन्द्रयुर् मदम् मदिष्ठ वीतये ।
गुहा चिद् दधिषे गिरः ॥ १ ००६ ०९

(७१९)

असृग्रम् इन्दवः पथा धर्मन्न् ऋतस्य सुश्रियः ।
विदाना अस्य योजनम् ॥ १ ००७ ०१
प्र धारा मध्वो अग्रियो महीर् अपो वि गाहते ।
हविर् हविष्षु वन्द्याः ॥ १ ००७ ०२
प्र युजो वाचो अग्रियो वृषाव चक्रदद् वने ।
सद्माभि सत्यो अध्वरः ॥ १ ००७ ०३
परि यत् काव्या कविर् नृम्णा वसानो अर्षति ।
स्वर् वाजी सिषासति ॥ १ ००७ ०४
पवमानो अभि स्पृधो विशो राजेव सीदति ।
यद् ईम् ऋण्वन्ति वेधसः ॥ १ ००७ ०५
अव्यो वारे परि प्रियो हरिर् वनेषु सीदति ।
रेभो वनुष्यते मती ॥ १ ००७ ०६
स वायुम् इन्द्रम् अश्विना साकम् मदेन गच्छति ।
रणा यो अस्य धर्मभिः ॥ १ ००७ ०७
आ मित्रावरुणा भगम् मध्वः पवन्त ऊर्मयः ।
विदाना अस्य शक्मभिः ॥ १ ००७ ०८
अस्मभ्यं रोदसी रयिम् मध्वो वाजस्य सातये ।
श्रवो वसूनि सं जितम् ॥ १ ००७ ०९

(७२०)

एते सोमा अभि प्रियम् इन्द्रस्य कामम् अक्षरन् ।
वर्धन्तो अस्य वीर्यम् ॥ १ ००८ ०१
पुनानास श्चमूषदो गच्छन्तो वायुम् अश्विना ।
ते नो धान्तु सुवीर्यम् ॥ १ ००८ ०२
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
ऋतस्य योनिम् आसदम् ॥ १ ००८ ०३
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।

अनु विप्रा अमादिषुः ॥ १ ००८ ०४
देवेभ्यस् त्वा मदाय कं सृजानम् अति मेष्यः ।
सं गोभिर् वासयामसि ॥ १ ००८ ०५
पुनानः कलशेष्व् आ वस्त्राण्य् अरुषो हरिः ।
परि गव्यान्य् अव्यत ॥ १ ००८ ०६
मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
इन्दो सखायम् आ विश ॥ १ ००८ ०७
वृष्टिं दिवः परि स्रव द्युम्नम् पृथिव्या अधि ।
सहो नः सोम पृत्सु धाः ॥ १ ००८ ०८
नृचक्षसं त्वा वयम् इन्द्रपीतं स्वर्विदम् ।
भक्षीमहि प्रजाम् इषम् ॥ १ ००८ ०९

(७२१)

परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।
सुवानो याति कविक्रतुः ॥ १ ००९ ०१
प्र-प्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे ।
वीत्य् अर्ष चनिष्ठया ॥ १ ००९ ०२
स सूनुर् मातरा शुचिर् जातो जाते अरोचयत् ।
महान् मही ऋतावृधा ॥ १ ००९ ०३
स सप्त धीतिभिर् हितो नद्यो अजिन्वद् अद्रुहः ।
या एकम् अक्षि वावृधुः ॥ १ ००९ ०४
ता अभि सन्तम् अस्तृतम् महे युवानम् आ दधुः ।
इन्दुम् इन्द्र तव व्रते ॥ १ ००९ ०५
अभि वह्निर् अमर्त्यः सप्त पश्यति वावहिः ।
क्रिविर् देवीर् अतर्पयत् ॥ १ ००९ ०६
अवा कल्पेषु नः पुमस् तमांसि सोम योध्या ।
तानि पुनान जङ्घनः ॥ १ ००९ ०७

नू नव्यसे नवीयसे सूक्ताय साधया पथः ।
प्रत्नवद् रोचया रुचः ॥ १ ००९ ०८
पवमान महि श्रवो गाम् अश्वं रासि वीरवत् ।
सना मेधां सना स्वः ॥ १ ००९ ०९

(७२२)

प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।
सोमासो राये अक्रमुः ॥ १ ०१० ०१
हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।
भरासः कारिणाम् इव ॥ १ ०१० ०२
राजानो न प्रशस्तिभिः सोमासो गोभिर् अञ्जते ।
यज्ञो न सप्त धातृभिः ॥ १ ०१० ०३
परि सुवानास इन्दवो मदाय बर्हणा गिरा ।
सुता अर्षन्ति धारया ॥ १ ०१० ०४
आपानासो विवस्वतो जनन्त उषसो भगम् ।
सूरा अण्वं वि तन्वते ॥ १ ०१० ०५
अप द्वारा मतीनाम् प्रत्ना ऋण्वन्ति कारवः ।
वृष्णो हरस आयवः ॥ १ ०१० ०६
समीचीनास आसते होतारः सप्तजामयः ।
पदम् एकस्य पिप्रतः ॥ १ ०१० ०७
नाभा नाभिं न आ ददे चक्षुश् चित् सूर्ये सचा ।
कवेर् अपत्यम् आ दुहे ॥ १ ०१० ०८
अभि प्रिया दिवस् पदम् अध्वर्युभिर् गुहा हितम् ।
सूरः पश्यति चक्षसा ॥ १ ०१० ०९

(७२३)

उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवाꣳ इयक्षते ॥ ९ ०११ ०१
अभि ते मधुना पयो ऽथर्वाणो अशिश्रयुः ।
देवं देवाय देवयु ॥ ९ ०११ ०२
स नः पवस्व शं गवे शं जनाय शम् अर्वते ।
शं राजन्न् ओषधीभ्यः ॥ ९ ०११ ०३
बभ्रवे नु स्वतवसे ऽरुणाय दिविस्पृशे ।
सोमाय गाथम् अर्चत ॥ ९ ०११ ०४
हस्तच्युतेभिर् अद्रिभिः सुतं सोमम् पुनीतन ।
मधाव् आ धावता मधु ॥ ९ ०११ ०५
नमसेद् उप सीदत दध्नेद् अभि श्रीणीतन ।
इन्दुम् इन्द्रे दधातन ॥ ९ ०११ ०६
अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।
देवेभ्यो अनुकामकृत् ॥ ९ ०११ ०७
इन्द्राय सोम पातवे मदाय परि षिच्यसे ।
मनश्चिन् मनसस् पतिः ॥ ९ ०११ ०८
पवमान सुवीर्यं रयिं सोम रिरीहि नः ।
इन्दव् इन्द्रेण नो युजा ॥ ९ ०११ ०९

(७२४)

सोमा असृग्रम् इन्दवः सुता ऋतस्य सादने ।
इन्द्राय मधुमत्तमाः ॥ ९ ०१२ ०१
अभि विप्रा अनूषत गावो वत्सं न मातरः ।
इन्द्रं सोमस्य पीतये ॥ ९ ०१२ ०२
मदच्युत् क्षेति सादने सिन्धोर् ऊर्मा विपश्चित् ।
सोमो गौरी अधि श्रितः ॥ ९ ०१२ ०३
दिवो नाभा विचक्षणो ऽव्यो वारे महीयते ।

सोमो यः सुक्रतुः कविः ॥ ९ ०१२ ०४
यः सोमः कलशेष्व् आँ अन्तः पवित्र आहितः ।
तम् इन्दुः परि षस्वजे ॥ ९ ०१२ ०५
प्र वाचम् इन्दुर् इष्यति समुद्रस्याधि विष्टपि ।
जिन्वन् कोशम् मधुश्चुतम् ॥ ९ ०१२ ०६
नित्यस्तोत्रो वनस्पतिर् धीनाम् अन्तः सबर्दुघः ।
हिन्वानो मानुषा युगा ॥ ९ ०१२ ०७
अभि प्रिया दिवस् पदा सोमो हिन्वानो अर्षति ।
विप्रस्य धारया कविः ॥ ९ ०१२ ०८
आ पवमान धारय रयिं सहस्रवर्चसम् ।
अस्मे इन्दो स्वाभुवम् ॥ ९ ०१२ ०९

(७२५)
सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
वायोर् इन्द्रस्य निष्कृतम् ॥ ९ ०१३ ०१
पवमानम् अवस्यवो विप्रम् अभि प्र गायत ।
सुष्वाणं देववीतये ॥ ९ ०१३ ०२
पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
गृणाना देववीतये ॥ ९ ०१३ ०३
उत नो वाजसातये पवस्व बृहतीर् इषः ।
द्युमद् इन्दो सुवीर्यम् ॥ ९ ०१३ ०४
ते नः सहस्रिणं रयिम् पवन्ताम् आ सुवीर्यम् ।
सुवाना देवास इन्दवः ॥ ९ ०१३ ०५
अत्या हियाना न हेतृभिर् असृग्रं वाजसातये ।
वि वारम् अव्यम् आशवः ॥ ९ ०१३ ०६
वाश्रा अर्षन्तीन्दवो ऽभि वत्सं न धेनवः ।
दधन्विरे गभस्त्योः ॥ ९ ०१३ ०७

जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् ।
विश्वा अप द्विषो जहि ॥ १ ०१३ ०८
अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
योनाव् ऋतस्य सीदत ॥ १ ०१३ ०९

(७२६)

परि प्रासिष्यदत् कविः सिन्धोर् ऊर्मावधि श्रितः ।
कारम् बिभ्रत् पुरुस्पृहम् ॥ १ ०१४ ०१
गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः ।
परिष्कृण्वन्ति धर्णसिम् ॥ १ ०१४ ०२
आद् अस्य शुष्मिणो रसे विश्वे देवा अमत्सत ।
यदी गोभिर् वसायते ॥ १ ०१४ ०३
निरिणानो वि धावति जहच् छर्याणि तान्वा ।
अत्रा सं जिघ्नते युजा ॥ १ ०१४ ०४
नप्तीभिर् यो विवस्वतः शुभ्रो न मामृजे युवा ।
गाः कृण्वानो न निर्णिजम् ॥ १ ०१४ ०५
अति श्रिती तिरश्चता गव्या जिगात्य् अण्व्या ।
वग्नुम् इयर्ति यं विदे ॥ १ ०१४ ०६
अभि क्षिपः सम् अग्मत मर्जयन्तीर् इषस् पतिम् ।
पृष्ठा गृभ्णत वाजिनः ॥ १ ०१४ ०७
परि दिव्यानि मर्मृशद् विश्वानि सोम पार्थिवा ।
वसूनि याह्य अस्मयुः ॥ १ ०१४ ०८

(७२७)

एष धिया यात्य् अण्व्या शूरो रथेभिर् आशुभिः ।
गच्छन्न् इन्द्रस्य निष्कृतम् ॥ १ ०१५ ०१

एष पुरू धियायते बृहते देवतातये ।
यत्रामृतास आसते ॥ ९ ०१५ ०२
एष हितो वि नीयते ऽन्तः शुभ्रावता पथा ।
यदी तुञ्जन्ति भूर्णयः ॥ ९ ०१५ ०३
एष शृङ्गाणि दोधुवच् छिशीते यूथ्यो३ वृषा ।
नृम्णा दधान ओजसा ॥ ९ ०१५ ०४
एष रुक्मिभिर् ईयते वाजी शुभ्रेभिर् अंशुभिः ।
पतिः सिन्धूनाम् भवन् ॥ ९ ०१५ ०५
एष वसूनि पिब्दना परुषा ययिवाꣳ अति ।
अव शादेषु गच्छति ॥ ९ ०१५ ०६
एतम् मृजन्ति मर्ज्यम् उप द्रोणेष्व् आयवः ।
प्रचक्राणम् महीर् इषः ॥ ९ ०१५ ०७
एतम् उ त्यं दश क्षिपो मृजन्ति सप्त धीतयः ।
स्वायुधम् मदिन्तमम् ॥ ९ ०१५ ०८

(७२८)

प्र ते सोतार ओण्यो३ रसम् मदाय घृष्वये ।
सर्गो न तक्त्य् एतशः ॥ ९ ०१६ ०१
क्रत्वा दक्षस्य रथ्यम् अपो वसानम् अन्धसा ।
गोषाम् अण्वेषु सश्चिम ॥ ९ ०१६ ०२
अनप्तम् अप्सु दुष्टरं सोमम् पवित्र आ सृज ।
पुनीहीन्द्राय पातवे ॥ ९ ०१६ ०३
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति ।
क्रत्वा सधस्थम् आसदत् ॥ ९ ०१६ ०४
प्र त्वा नमोभिर् इन्दव इन्द्र सोमा असृक्षत ।
महे भराय कारिणः ॥ ९ ०१६ ०५
पुनानो रूपे अव्यये विश्वा अर्षन्न् अभि श्रियः ।

शूरो न गोषु तिष्ठति ॥ ९ ०१६ ०६
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः ।
वृथा पवित्रे अर्षति ॥ ९ ०१६ ०७
त्वं सोम विपश्चितं तना पुनान आयुषु ।
अव्यो वारं वि धावसि ॥ ९ ०१६ ०८

(७२९)
प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः ।
सोमा असृग्रम् आशवः ॥ ९ ०१७ ०१
अभि सुवानास इन्दवो वृष्टयः पृथिवीम् इव ।
इन्द्रं सोमासो अक्षरन् ॥ ९ ०१७ ०२
अत्यूर्मिर् मत्सरो मदः सोमः पवित्रे अर्षति ।
विघ्नन् रक्षांसि देवयुः ॥ ९ ०१७ ०३
आ कलशेषु धावति पवित्रे परि षिच्यते ।
उक्थैर् यज्ञेषु वर्धते ॥ ९ ०१७ ०४
अति त्री सोम रोचना रोहन् न भ्राजसे दिवम् ।
इष्णन् सूर्यं न चोदयः ॥ ९ ०१७ ०५
अभि विप्रा अनूषत मूर्धन् यज्ञस्य कारवः ।
दधानाश् चक्षसि प्रियम् ॥ ९ ०१७ ०६
तम् उ त्वा वाजिनं नरो धीभिर् विप्रा अवस्यवः ।
मृजन्ति देवतातये ॥ ९ ०१७ ०७
मधोर् धाराम् अनु क्षर तीव्रः सधस्थम् आसदः ।
चारुर् ऋताय पीतये ॥ ९ ०१७ ०८

(७३०)
परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः ।

मदेषु सर्वधा असि ॥ ९ ०१८ ०१
त्वं विप्रस् त्वं कविर् मधु प्र जातम् अन्धसः ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०२
तव विश्वे सजोषसो देवासः पीतिम् आशत ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०३
आ यो विश्वानि वार्या वसूनि हस्तयोर् दधे ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०४
य इमे रोदसी मही सम् मातरेव दोहते ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०५
परि यो रोदसी उभे सद्यो वाजेभिर् अर्षति ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०६
स शुष्मी कलशेष्व् आ पुनानो अचिक्रदत् ।
मदेषु सर्वधा असि ॥ ९ ०१८ ०७

(७३१)
यत् सोम चित्रम् उक्थ्यं दिव्यम् पार्थिवं वसु ।
तन् नः पुनान आ भर ॥ ९ ०१९ ०१
युवं हि स्थः स्वर्पती इन्द्रश् च सोम गोपती ।
ईशाना पिप्यतं धियः ॥ ९ ०१९ ०२
वृषा पुनान आयुषु स्तनयन्न् अधि बर्हिषि ।
हरिः सन् योनिम् आसदत् ॥ ९ ०१९ ०३
अवावशन्त धीतयो वृषभस्याधि रेतसि ।
सूनोर् वत्सस्य मातरः ॥ ९ ०१९ ०४
कविद् वृषण्यन्तीभ्यः पुनानो गर्भम् आदधत् ।
याः शुक्रं दुहते पयः ॥ ९ ०१९ ०५
उप शिक्षापतस्थुषो भियसम् आ धेहि शत्रुषु ।
पवमान विदा रयिम् ॥ ९ ०१९ ०६

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस् तिर ।
दूरे वा सतो अन्ति वा ॥ १ ०११ ०७

(७३२)

प्र कविर् देववीतये ऽव्यो वारेभिर् अर्षति ।
साह्वान् विश्वा अभि स्पृधः ॥ १ ०२० ०१
स हि ष्मा जरितृभ्य आ वाजं गोमन्तम् इन्वति ।
पवमानः सहस्रिणम् ॥ १ ०२० ०२
परि विश्वानि चेतसा मृशसे पवसे मती ।
स नः सोम श्रवो विदः ॥ १ ०२० ०३
अभ्य् अर्ष बृहद् यशो मघवद्भ्यो ध्रुवं रयिम् ।
इषं स्तोतृभ्य आ भर ॥ १ ०२० ०४
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।
पुनानो वह्ने अद्भुत ॥ १ ०२० ०५
स वह्निर् अप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
सोमश् चमूषु सीदति ॥ १ ०२० ०६
क्रीळुर् मखो न मंहयुः पवित्रं सोम गच्छसि ।
दधत् स्तोत्रे सुवीर्यम् ॥ १ ०२० ०७

(७३३)

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः ।
मत्सरासः स्वर्विदः ॥ १ ०२१ ०१
प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः ।
स्वयं स्तोत्रे वयस्कृतः ॥ १ ०२१ ०२
वृथा क्रीळन्त इन्दवः सधस्थम् अभ्य् एकम् इत् ।
सिन्धोर् ऊर्मा व्य् अक्षरन् ॥ १ ०२१ ०३
एते विश्वानि वार्या पवमानास आशत ।

हिता न सप्तयो रथे ॥ १ ०२१ ०४
आस्मिन् पिशङ्गम् इन्दवो दधाता वेनम् आदिशे ।
यो अस्मभ्यम् अरावा ॥ १ ०२१ ०५
ऋभुर् न रथ्यं नवं दधाता केतम् आदिशे ।
शुक्राः पवध्वम् अर्णसा ॥ १ ०२१ ०६
एत उ त्ये अवीवशन् काष्ठा वाजिनो अक्रत ।
सतः प्रासाविषुर् मतिम् ॥ १ ०२१ ०७

(७३४)
एते सोमास आशवो रथा इव प्र वाजिनः ।
सर्गाः सृष्टा अहेषत ॥ १ ०२२ ०१
एते वाता इवोरवः पर्जन्यस्येव वृष्टयः ।
अग्नेर् इव भ्रमा वृथा ॥ १ ०२२ ०२
एते पूता विपश्चितः सोमासो दध्याशिरः ।
विपा व्य् आनशुर् धियः ॥ १ ०२२ ०३
एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः ।
इयक्षन्तः पथो रजः ॥ १ ०२२ ०४
एते पृष्ठानि रोदसोर् विप्रयन्तो व्य् आनशुः ।
उतेदम् उत्तमं रजः ॥ १ ०२२ ०५
तन्तुं तन्वानम् उत्तमम् अनु प्रवत आशत ।
उतेदम् उत्तमाय्यम् ॥ १ ०२२ ०६
त्वं सोम पणिभ्य आ वसु गव्यानि धारयः ।
ततं तन्तुम् अचिक्रदः ॥ १ ०२२ ०७

(७३५)
सोमा असृग्रम् आशवो मधोर् मदस्य धारया ।

अभि विश्वानि काव्या ॥ १ ०२३ ०१
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
रुचे जनन्त सूर्यम् ॥ १ ०२३ ०२
आ पवमान नो भरार्यो अदाशुषो गयम् ।
कृधि प्रजावतीर् इषः ॥ १ ०२३ ०३
अभि सोमास आयवः पवन्ते मद्यम् मदम् ।
अभि कोशम् मधुश्चुतम् ॥ १ ०२३ ०४
सोमो अर्षति धर्णसिर् दधान इन्द्रियं रसम् ।
सुवीरो अभिशस्तिपाः ॥ १ ०२३ ०५
इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः ।
इन्दो वाजं सिषाससि ॥ १ ०२३ ०६
अस्य पीत्वा मदानाम् इन्द्रो वृत्राण्य् अप्रति ।
जघान जघनच् च नु ॥ १ ०२३ ०७

(७३६)
प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
श्रीणाना अप्सु मृञ्जत ॥ १ ०२४ ०१
अभि गावो अधन्विषुर् आपो न प्रवता यतीः ।
पुनाना इन्द्रम् आशत ॥ १ ०२४ ०२
प्र पवमान धन्वसि सोमेन्द्राय पातवे ।
नृभिर् यतो वि नीयसे ॥ १ ०२४ ०३
त्वं सोम नृमादनः पवस्व चर्षणीसहे ।
सस्निर् यो अनुमाद्यः ॥ १ ०२४ ०४
इन्दो यद् अद्रिभिः सुतः पवित्रम् परिधावसि ।
अरम् इन्द्रस्य धाम्ने ॥ १ ०२४ ०५
पवस्व वृत्रहन्तमोक्थेभिर् अनुमाद्यः ।
शुचिः पावको अद्भुतः ॥ १ ०२४ ०६

शुचिः पावक उच्यते सोमः सुतस्य मध्वः ।
देवावीर् अघशंसहा ॥ १ ०२४ ०७

(७३७)

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ॥ १ ०२५ ०१
पवमान धिया हितो ऽभि योनिं कनिक्रदत् ।
धर्मणा वायुम् आ विश ॥ १ ०२५ ०२
सं देवैः शोभते वृषा कविर् योनाव् अधि प्रियः ।
वृत्रहा देववीतमः ॥ १ ०२५ ०३
विश्वा रूपाण्य् आविशन् पुनानो याति हर्यतः ।
यत्रामृतास आसते ॥ १ ०२५ ०४
अरुषो जनयन् गिरः सोमः पवत आयुषक् ।
इन्द्रं गच्छन् कविक्रतुः ॥ १ ०२५ ०५
आ पवस्व मदिन्तम पवित्रं धारया कवे ।
अर्कस्य योनिम् आसदम् ॥ १ ०२५ ०६

(७३८)

तम् अमृक्षन्त वाजिनम् उपस्थे अदितेर् अधि ।
विप्रासो अण्व्या धिया ॥ १ ०२६ ०१
तं गावो अभ्य् अनूषत सहस्रधारम् अक्षितम् ।
इन्दुं धर्तारम् आ दिवः ॥ १ ०२६ ०२
तं वेधाम् मेधयाह्यन् पवमानम् अधि द्यवि ।
धर्णसिम् भूरिधायसम् ॥ १ ०२६ ०३
तम् अह्यन् भुरिजोर् धिया संवसानं विवस्वतः ।
पतिं वाचो अदाभ्यम् ॥ १ ०२६ ०४

तं सानाव् अधि जामयो हरिं हिन्वन्त्य् अद्रिभिः ।
हर्यतम् भूरिचक्षसम् ॥ १ ०२६ ०५
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् ।
इन्दव् इन्द्राय मत्सरम् ॥ १ ०२६ ०६

(७३९)

एष कविर् अभिष्टुतः पवित्रे अधि तोशते ।
पुनानो घ्नन्न् अप स्रिधः ॥ १ ०२७ ०१
एष इन्द्राय वायवे स्वर्जित् परि षिच्यते ।
पवित्रे दक्षसाधनः ॥ १ ०२७ ०२
एष नृभिर् वि नीयते दिवो मूर्धा वृषा सुतः ।
सोमो वनेषु विश्ववित् ॥ १ ०२७ ०३
एष गव्युर् अचिक्रदत् पवमानो हिरण्ययुः ।
इन्दुः सत्राजिद् अस्तृतः ॥ १ ०२७ ०४
एष सूर्येण हासते पवमानो अधि द्यवि ।
पवित्रे मत्सरो मदः ॥ १ ०२७ ०५
एष शुष्म्य् असिष्यदद् अन्तरिक्षे वृषा हरिः ।
पुनान इन्दुर् इन्द्रम् आ ॥ १ ०२७ ०६

(७४०)

एष वाजी हितो नृभिर् विश्ववित् मनसस् पतिः ।
अव्यो वारं वि धावति ॥ १ ०२८ ०१
एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः ।
विश्वा धामान्य् आविशन् ॥ १ ०२८ ०२
एष देवः शुभायते ऽधि योनाव् अमर्त्यः ।
वृत्रहा देववीतमः ॥ १ ०२८ ०३

एष वृषा कनिक्रदद् दशभिर् जामिभिर् यतः ।
अभि द्रोणानि धावति ॥ १ ०२८ ०४
एष सूर्यम् अरोचयत् पवमानो विचर्षणिः ।
विश्वा धामानि विश्ववित् ॥ १ ०२८ ०५
एष शुष्म्य् अदाभ्यः सोमः पुनानो अर्षति ।
देवावीर् अघशंसहा ॥ १ ०२८ ०६

(७४१)

प्रास्य धारा अक्षरन् वृष्णः सुतस्यौजसा ।
देवाँ अनु प्रभूषतः ॥ १ ०२९ ०१
सप्तिम् मृजन्ति वेधसो गृणन्तः कारवो गिरा ।
ज्योतिर् जज्ञानम् उक्थ्यम् ॥ १ ०२९ ०२
सुषहा सोम तानि ते पुनानाय प्रभूवसो ।
वधा समुद्रम् उक्थ्यम् ॥ १ ०२९ ०३
विश्वा वसूनि संजयन् पवस्व सोम धारया ।
इनु द्वेषांसि सध्र्यक् ॥ १ ०२९ ०४
रक्षा सु नो अरारुषः स्वनात् समस्य कस्य चित् ।
निदो यत्र मुमुच्महे ॥ १ ०२९ ०५
एन्दो पार्थिवं रयिं दिव्यम् पवस्व धारया ।
द्युमन्तं शुष्मम् आ भर ॥ १ ०२९ ०६

(७४२)

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् ।
पुनानो वाचम् इष्यति ॥ १ ०३० ०१
इन्दुर् हियानः सोतृभिर् मृज्यमानः कनिक्रदत् ।
इयर्ति वग्नुम् इन्द्रियम् ॥ १ ०३० ०२

आ नः शुष्मं नृषाह्यं वीरवन्तम् पुरुस्पृहम् ।
पवस्व सोम धारया ॥ १ ०३० ०३
प्र सोमो अति धारया पवमानो असिष्यदत् ।
अभि द्रोणान्य् आसदम् ॥ १ ०३० ०४
अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्य् अद्रिभिः ।
इन्दव् इन्द्राय पीतये ॥ १ ०३० ०५
सुनोता मधुमत्तमं सोमम् इन्द्राय वज्रिणे ।
चारुं शर्धाय मत्सरम् ॥ १ ०३० ०६

(७४३)
प्र सोमासः स्वाध्य१ : पवमानासो अक्रमुः ।
रयिं कृण्वन्ति चेतनम् ॥ १ ०३१ ०१
दिवस् पृथिव्या अधि भवेन्दो द्युम्नवर्धनः ।
भवा वाजानाम् पतिः ॥ १ ०३१ ०२
तुभ्यं वाता अभिप्रियस् तुभ्यम् अर्षन्ति सिन्धवः ।
सोम वर्धन्ति ते महः ॥ १ ०३१ ०३
आ प्यायस्व सम् एतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ॥ १ ०३१ ०४
तुभ्यं गावो घृतम् पयो बभ्रो दुदुह्रे अक्षितम् ।
वर्षिष्ठ अधि सानवि ॥ १ ०३१ ०५
स्वायुधस्य ते सतो भुवनस्य पते वयम् ।
इन्दो सखित्वम् उश्मसि ॥ १ ०३१ ०६

(७४४)
प्र सोमासो मदच्युतः श्रवसे नो मघोनः ।
सुता विदथे अक्रमुः ॥ १ ०३२ ०१

आद् ईं त्रितस्य योषणो हरिं हिन्वन्त्य् अद्रिभिः ।
इन्दुम् इन्द्राय पीतये ॥ १ ०३२ ०२
आद् ईं हंसो यथा गणं विश्वस्यावीवशन् मतिम् ।
अत्यो न गोभिर् अज्यते ॥ १ ०३२ ०३
उभे सोमावचाकशन् मृगो न तक्तो अर्षसि ।
सीदन्न् ऋतस्य योनिम् आ ॥ १ ०३२ ०४
अभि गावो अनूषत योषा जारम् इव प्रियम् ।
अगन्न् आजिं यथा हितम् ॥ १ ०३२ ०५
अस्मे धेहि द्युमद् यशो मघवञ्ज्यश् च मह्य च ।
सनिम् मेधाम् उत श्रवः ॥ १ ०३२ ०६

(७४५)

प्र सोमासो विपश्चितो ऽपां न यन्त्य् ऊर्मयः ।
वनानि महिषा इव ॥ १ ०३३ ०१
अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
वाजं गोमन्तम् अक्षरन् ॥ १ ०३३ ०२
सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
सोमा अर्षन्ति विष्णवे ॥ १ ०३३ ०३
तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
हरिर् एति कनिक्रदत् ॥ १ ०३३ ०४
अभि ब्रह्मीर् अनूषत यह्वीर् ऋतस्य मातरः ।
मर्मृज्यन्ते दिवः शिशुम् ॥ १ ०३३ ०५
रायः समुद्रांश् चतुरो ऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणः ॥ १ ०३३ ०६

(७४६)

प्र सुवानो धारया तनेन्दुर् हिन्वानो अर्षति ।
रुजद् दृळ्हा व्य् ओजसा ॥ १ ०३४ ०१
सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
सोमो अर्षति विष्णवे ॥ १ ०३४ ०२
वृषाणं वृषभिर् यतं सुन्वन्ति सोमम् अद्रिभिः ।
दुहन्ति शक्मना पयः ॥ १ ०३४ ०३
भुवत् त्रितस्य मज्र्यो भुवद् इन्द्राय मत्सरः ।
सं रूपैर् अज्यते हरिः ॥ १ ०३४ ०४
अभीम् ऋतस्य विष्टपं दुहते पृश्निमातरः ।
चारु प्रियतमं हविः ॥ १ ०३४ ०५
सम् एनम् अह्रुता इमा गिरो अर्षन्ति सस्रुतः ।
धेनूर् वाश्रो अवीवशत् ॥ १ ०३४ ०६

(७४७)

आ नः पवस्व धारया पवमान रयिम् पृथुम् ।
यया ज्योतिर् विदासि नः ॥ १ ०३५ ०१
इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय ।
रायो धर्ता न ओजसा ॥ १ ०३५ ०२
त्वया वीरेण वीरवो ऽभि ष्याम पृतन्यतः ।
क्षरा णो अभि वार्यम् ॥ १ ०३५ ०३
प्र वाजम् इन्दुर् इष्यति सिषासन् वाजसा ऋषिः ।
व्रता विदान आयुधा ॥ १ ०३५ ०४
तं गीर्भिर् वाचमीङ्खयम् पुनानं वासयामसि ।
सोमं जनस्य गोपतिम् ॥ १ ०३५ ०५
विश्वो यस्य व्रते जनो दाधार धर्मणस् पतेः ।
पुनानस्य प्रभूवसोः ॥ १ ०३५ ०६

(७४८)

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
कार्ष्मन् वाजी न्य् अक्रमीत् ॥ १ ०३६ ०१
स वह्निः सोम जागृविः पवस्व देववीर् अति ।
अभि कोशम् मधुश्चुतम् ॥ १ ०३६ ०२
स नो ज्योतींषि पूर्व्य पवमान वि रोचय ।
क्रत्वे दक्षाय नो हिनु ॥ १ ०३६ ०३
शुम्भमान ऋतायुभिर् मृज्यमानो गभस्त्योः ।
पवते वारे अव्यये ॥ १ ०३६ ०४
स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा ।
पवताम् आन्तरिक्ष्या ॥ १ ०३६ ०५
आ दिवस् पृष्ठम् अश्वयुर् गव्ययुः सोम रोहसि ।
वीरयुः शवसस् पते ॥ १ ०३६ ०६

(७४९)

स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।
विघ्नन् रक्षांसि देवयुः ॥ १ ०३७ ०१
स पवित्रे विचक्षणो हरिर् अर्षति धर्णसिः ।
अभि योनिं कनिक्रदत् ॥ १ ०३७ ०२
स वाजी रोचना दिवः पवमानो वि धावति ।
रक्षोहा वारम् अव्ययम् ॥ १ ०३७ ०३
स त्रितस्याधि सानवि पवमानो अरोचयत् ।
जामिभिः सूर्यं सह ॥ १ ०३७ ०४
स वृत्रहा वृषा सुतो वरिवोविद् अदाभ्यः ।
सोमो वाजम् इवासरत् ॥ १ ०३७ ०५
स देवः कविनेषितो ऽभि द्रोणानि धावति ।

इन्दुर् इन्द्राय मंहना ॥ १ ०३७ ०६

(७५०)

एष उ स्य वृषा रथो ऽव्यो वारेभिर् अर्षति ।
गच्छन् वाजं सहस्रिणम् ॥ १ ०३८ ०१
एतं त्रितस्य योषणो हरिं हिन्वन्त्य् अद्रिभिः ।
इन्दुम् इन्द्राय पीतये ॥ १ ०३८ ०२
एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।
याभिर् मदाय शुम्भते ॥ १ ०३८ ०३
एष स्य मानुषीष्व् आ श्येनो न विक्षु सीदति ।
गच्छन्न् जारो न योषितम् ॥ १ ०३८ ०४
एष स्य मद्यो रसो ऽव चष्टे दिवः शिशुः ।
य इन्दुर् वारम् आविशत् ॥ १ ०३८ ०५
एष स्य पीतये सुतो हरिर् अर्षति धर्णसिः ।
क्रन्दन् योनिम् अभि प्रियम् ॥ १ ०३८ ०६

(७५१)

आशुर् अर्ष बृहन्मते परि प्रियेण धाम्ना ।
यत्र देवा इति ब्रवन् ॥ १ ०३९ ०१
परिष्कृण्वन्न् अनिष्कृतं जनाय यातयन्न् इषः ।
वृष्टिं दिवः परि स्रव ॥ १ ०३९ ०२
सुत एति पवित्र आ त्विषिं दधान ओजसा ।
विचक्षाणो विरोचयन् ॥ १ ०३९ ०३
अयं स यो दिवस् परि रघुयामा पवित्र आ ।
सिन्धोर् ऊर्मा व्य् अक्षरत् ॥ १ ०३९ ०४
आविवासन् परावतो अथो अर्वावतः सुतः ।

इन्द्राय सिच्यते मधु ॥ १ ०३१ ०५
समीचीना अनूषत हरिं हिन्वन्त्य् अद्रिभिः ।
योनाव् ऋतस्य सीदत ॥ १ ०३१ ०६

(७५२)

पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
शुम्भन्ति विप्रं धीतिभिः ॥ १ ०४० ०१
आ योनिम् अरुणो रुहद् गमद् इन्द्रं वृषा सुतः ।
ध्रुवे सदसि सीदति ॥ १ ०४० ०२
नू नो रयिम् महाम् इन्दो ऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥ १ ०४० ०३
विश्वा सोम पवमान द्युम्नानीन्दव् आ भर ।
विदाः सहस्रिणीर् इषः ॥ १ ०४० ०४
स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् ।
जरितुर् वर्धया गिरः ॥ १ ०४० ०५
पुनान इन्दव् आ भर सोम द्विबर्हसं रयिम् ।
वृषन्न् इन्दो न उक्थ्यम् ॥ १ ०४० ०६

(७५३)

प्र ये गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
घ्नन्तः कृष्णाम् अप त्वचम् ॥ १ ०४१ ०१
सुवितस्य मनामहे ऽति सेतुं दुराव्यम् ।
साह्वांसो दस्युम् अव्रतम् ॥ १ ०४१ ०२
शृण्वे वृष्टेर् इव स्वनः पवमानस्य शुष्मिणः ।
चरन्ति विद्युतो दिवि ॥ १ ०४१ ०३
आ पवस्व महीम् इषं गोमद् इन्दो हिरण्यवत् ।

अश्वावद् वाजवत् सुतः ॥ ९ ०४१ ०४
स पवस्व विचर्षण आ मही रोदसी पृण ।
उषाः सूर्यो न रश्मिभिः ॥ ९ ०४१ ०५
परि णः शर्मयन्त्या धारया सोम विश्वतः ।
सरा रसेव विष्टपम् ॥ ९ ०४१ ०६

(७५४)
जनयन् रोचना दिवो जनयन्न् अप्सु सूर्यम् ।
वसानो गा अपो हरिः ॥ ९ ०४२ ०१
एष प्रत्नेन मन्मना देवो देवेभ्यस् परि ।
धारया पवते सुतः ॥ ९ ०४२ ०२
वावृधानाय तूर्वये पवन्ते वाजसातये ।
सोमाः सहस्रपाजसः ॥ ९ ०४२ ०३
दुहानः प्रत्नम् इत् पयः पवित्रे परि षिच्यते ।
क्रन्दन् देवाँ अजीजनत् ॥ ९ ०४२ ०४
अभि विश्वानि वार्याभि देवाँ ऋतावृधः ।
सोमः पुनानो अर्षति ॥ ९ ०४२ ०५
गोमन् नः सोम वीरवद् अश्वावद् वाजवत् सुतः ।
पवस्व बृहतीर् इषः ॥ ९ ०४२ ०६

(७५५)
यो अत्य इव मृज्यते गोभिर् मदाय हर्यतः ।
तं गीर्भिर् वासयामसि ॥ ९ ०४३ ०१
तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा ।
इन्दुम् इन्द्राय पीतये ॥ ९ ०४३ ०२
पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः ।

विप्रस्य मेध्यातिथेः ॥ १ ०४३ ०३
पवमान विदा रयिम् अस्मभ्यं सोम सुश्रियम् ।
इन्दो सहस्रवर्चसम् ॥ १ ०४३ ०४
इन्दुर् अत्यो न वाजसृत् कनिक्रन्ति पवित्र आ ।
यद् अक्षार् अति देवयुः ॥ १ ०४३ ०५
पवस्व वाजसातये विप्रस्य गृणतो वृधे ।
सोम रास्व सुवीर्यम् ॥ १ ०४३ ०६

(७५६)
प्र ण इन्दो महे तन ऊर्मिं न बिभ्रद् अर्षसि ।
अभि देवाꣳ अयास्यः ॥ १ ०४४ ०१
मती जुष्टो धिया हितः सोमो हिन्वे परावति ।
विप्रस्य धारया कविः ॥ १ ०४४ ०२
अयं देवेषु जागृविः सुत एति पवित्र आ ।
सोमो याति विचर्षणिः ॥ १ ०४४ ०३
स नः पवस्व वाजयुश् चक्राणश् चारुम् अध्वरम् ।
बर्हिष्माꣳ आ विवासति ॥ १ ०४४ ०४
स नो भगाय वायवे विप्रवीरः सदावृधः ।
सोमो देवेष्व् आ यमत् ॥ १ ०४४ ०५
स नो अद्य वसुत्तये क्रतुविद् गातुवित्तमः ।
वाजं जेषि श्रवो बृहत् ॥ १ ०४४ ०६

(७५७)
स पवस्व मदाय कं नृचक्षा देववीतये ।
इन्दव् इन्द्राय पीतये ॥ १ ०४५ ०१
स नो अर्षाभि दुत्य ं त्वम् इन्द्राय तोशसे ।

देवान् सखिभ्य आ वरम् ॥ १ ०४५ ०२
उत त्वाम् अरुणं वयं गोभिर् अञ्जमो मदाय कम् ।
वि नो राये दुरो वृधि ॥ १ ०४५ ०३
अत्य् ऊ पवित्रम् अक्रमीद् वाजी धुरं न यामनि ।
इन्दुर् देवेषु पत्यते ॥ १ ०४५ ०४
सम् ई सखायो अस्वरन् वने क्रीळन्तम् अत्यविम् ।
इन्दुं नावा अनूषत ॥ १ ०४५ ०५
तया पवस्व धारया यया पीतो विचक्षसे ।
इन्दो स्तोत्रे सुवीर्यम् ॥ १ ०४५ ०६

(७५८)

असृग्रन् देववीतये ऽत्यासः कृत्व्या इव ।
क्षरन्तः पर्वतावृधः ॥ १ ०४६ ०१
परिष्कृतास इन्दवो योषेव पित्र्यावती ।
वायुं सोमा असृक्षत ॥ १ ०४६ ०२
एते सोमास इन्दवः प्रयस्वन्तः चमू सुताः ।
इन्द्रं वर्धन्ति कर्मभिः ॥ १ ०४६ ०३
आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना ।
गोभिः श्रीणीत मत्सरम् ॥ १ ०४६ ०४
स पवस्व धनंजय प्रयन्ता राधसो महः ।
अस्मभ्यं सोम गातुवित् ॥ १ ०४६ ०५
एतम् मृजन्ति मर्ज्यम् पवमानं दश क्षिपः ।
इन्द्राय मत्सरम् मदम् ॥ १ ०४६ ०६

(७५९)

अया सोमः सुकृत्यया महश् चिद् अभ्य् अवर्धत ।

मन्दान उद् वृषायते ॥ १ ०४७ ०१
कृतानीद् अस्य कर्त्वा चेतन्ते दस्युतर्हणा ।
ऋणा च धृष्णुश् चयते ॥ १ ०४७ ०२
आत् सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् ।
उक्थं यद् अस्य जायते ॥ १ ०४७ ०३
स्वयं कविर् विधर्तरि विप्राय रत्नम् इच्छति ।
यदी मर्मृज्यते धियः ॥ १ ०४७ ०४
सिषासतू रयीणां वाजेष्व् अर्वताम् इव ।
भरेषु जिग्युषाम् असि ॥ १ ०४७ ०५

(७६०)
तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।
चारुं सुकृत्ययेमहे ॥ १ ०४८ ०१
संवृक्तधृष्णुम् उक्थ्यम् महामहिव्रतम् मदम् ।
शतम् पुरो रुरुक्षणिम् ॥ १ ०४८ ०२
अतस् त्वा रयिम् अभि राजानं सुक्रतो दिवः ।
सुपर्णो अव्यथिर् भरत् ॥ १ ०४८ ०३
विश्वस्मा इत् स्वर् दृशे साधारणं रजस्तुरम् ।
गोपाम् ऋतस्य विर् भरत् ॥ १ ०४८ ०४
अधा हिन्वान इन्द्रियं ज्यायो महित्वम् आनशे ।
अभिष्टिकृद् विचर्षणिः ॥ १ ०४८ ०५

(७६१)
पवस्व वृष्टिम् आ सु नो ऽपाम् ऊर्मिं दिवस् परि ।
अयक्ष्मा बृहतीर् इषः ॥ १ ०४९ ०१
तया पवस्व धारया यया गाव इहागमन् ।

जन्या॑स॒ उप॑ नो गृ॒हम् ॥ ९ ०४९ ०२
घृ॒तम् प॑वस्व॒ धार॑या य॒ज्ञेषु॑ देव॒वीत॑मः ।
अ॒स्मभ्यं॑ वृ॒ष्टिम् आ प॑व ॥ ९ ०४९ ०३
स न॑ ऊ॒र्जे व्य् अ १॒॑ व्यय॑म् प॒वित्रं॑ धाव॒ धार॑या ।
दे॒वासः॑ शृ॒णव॒न् हि क॑म् ॥ ९ ०४९ ०४
पव॑मानो असिष्यद॒द् रक्षां॑स्य् अप॒जङ्घ॑नत् ।
प्र॒त्न॒वद् रो॒चय॒न् रुचः॑ ॥ ९ ०४९ ०५

(७६२)
उत् ते॒ शुष्मा॑स ईरते॒ सिन्धो॑र् ऊ॒र्मेर् इ॑व स्व॒नः ।
वा॒णस्य॑ चोदया प॒विम् ॥ ९ ०५० ०१
प्र॒स॒वे त॒ उद् ई॑रते ति॒स्रो वाचो॑ मख॒स्युवः॑ ।
यद् अव्य॒ एषि॒ सान॑वि ॥ ९ ०५० ०२
अव्यो॒ वारे॒ परि॑ प्रि॒यं हरिं॑ हिन्व॒न्त्य् अद्रि॑भिः ।
पव॑मानम् मधु॒श्चुत॑म् ॥ ९ ०५० ०३
आ प॑वस्व मदिन्तम प॒वित्रं॒ धार॑या कवे ।
अ॒र्कस्य॒ योनि॑म् आ॒सद॑म् ॥ ९ ०५० ०४
स प॑वस्व मदिन्तम॒ गोभि॑र् अञ्जा॒नो अ॒क्तुभिः॑ ।
इन्द॒व् इन्द्रा॑य पी॒तये॑ ॥ ९ ०५० ०५

(७६३)
अध्व॑र्यो॒ अद्रि॑भिः सु॒तं सोम॑म् प॒वित्र॒ आ सृ॑ज ।
पु॒नी॒हीन्द्रा॑य॒ पात॑वे ॥ ९ ०५१ ०१
दि॒वः पी॒यूष॑म् उत्त॒मं सोम॒म् इन्द्रा॑य व॒ज्रिणे॑ ।
सु॒नोता॒ मधु॑मत्तमम् ॥ ९ ०५१ ०२
तव॒ त्य इ॑न्दो॒ अन्ध॑सो दे॒वा मधो॒र् व्य् अश्नते ।
पव॑मानस्य म॒रुतः॑ ॥ ९ ०५१ ०३

त्वं हि सोम वर्धयन् सुतो मदाय भूर्णये ।
वृषन् स्तोतारम् ऊतये ॥ १ ०५१ ०४
अभ्य् अर्ष विचक्षण पवित्रं धारया सुतः ।
अभि वाजम् उत श्रवः ॥ १ ०५१ ०५

(७६४)

परि द्युक्षः सनद्रयिर् भरद् वाजं नो अन्धसा ।
सुवानो अर्ष पवित्र आ ॥ १ ०५२ ०१
तव प्रत्नेभिर् अध्वभिर् अव्यो वारे परि प्रियः ।
सहस्रधारो यात् तना ॥ १ ०५२ ०२
चरुर् न यस् तम् ईङ्खयेन्दो न दानम् ईङ्खय ।
वधैर् वधस्नव् ईङ्खय ॥ १ ०५२ ०३
नि शुष्मम् इन्दव् एषाम् पुरुहूत जनानाम् ।
यो अस्माँ आदिदेशति ॥ १ ०५२ ०४
शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् ।
पवस्व मंहयद्रयिः ॥ १ ०५२ ०५

(७६५)

उत् ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
नुदस्व याः परिस्पृधः ॥ १ ०५३ ०१
अया निजघ्निर् ओजसा रथसंगे धने हिते ।
स्तवा अबिभ्युषा हृदा ॥ १ ०५३ ०२
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।
रुज यस् त्वा पृतन्यति ॥ १ ०५३ ०३
तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।
इन्दुम् इन्द्राय मत्सरम् ॥ १ ०५३ ०४

(७६६)

अस्य प्रत्नाम् अनु द्युतं शुक्रं दुदुह्रे अह्र्यः ।
पयः सहस्रसाम् ऋषिम् ॥ ९ ०५४ ०१
अयं सूर्य इवोपदृग् अयं सरांसि धावति ।
सप्त प्रवत आ दिवम् ॥ ९ ०५४ ०२
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
सोमो देवो न सूर्यः ॥ ९ ०५४ ०३
परि णो देववीतये वाजाँ अर्षसि गोमतः ।
पुनान इन्दव् इन्द्रयुः ॥ ९ ०५४ ०४

(७६७)

यवं-यवं नो अन्धसा पुष्टम्-पुष्टम् परि स्रव ।
सोम विश्वा च सौभगा ॥ ९ ०५५ ०१
इन्दो यथा तव स्तवो यथा ते जातम् अन्धसः ।
नि बर्हिषि प्रिये सदः ॥ ९ ०५५ ०२
उत नो गोविद् अश्ववित् पवस्व सोमान्धसा ।
मक्षूतमेभिर् अहभिः ॥ ९ ०५५ ०३
यो जिनाति न जीयते हन्ति शत्रुम् अभीत्य ।
स पवस्व सहस्रजित् ॥ ९ ०५५ ०४

(७६८)

परि सोम ऋतम् बृहद् आशुः पवित्रे अर्षति ।
विघ्नन् रक्षाँसि देवयुः ॥ ९ ०५६ ०१
यत् सोमो वाजम् अर्षति शतं धारा अपस्युवः ।

इन्द्रस्य सख्यम् आविशन् ॥ १ ०५६ ०२
अभि त्वा योषणो दश जारं न कन्यानूषत ।
मृज्यसे सोम सातये ॥ १ ०५६ ०३
त्वम् इन्द्राय विष्णवे स्वादुर् इन्दो परि स्रव ।
नॄन् स्तोतॄन् पाह्य अंहसः ॥ १ ०५६ ०४

(७६९)

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
अच्छा वाजं सहस्रिणम् ॥ १ ०५७ ०१
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
हरिस् तुञ्जान आयुधा ॥ १ ०५७ ०२
स मर्मृजान आयुभिर् इभो राजेव सुव्रतः ।
श्येनो न वंसु षीदति ॥ १ ०५७ ०३
स नो विश्वा दिवो वसूतो पृथिव्या अधि ।
पुनान इन्दव् आ भर ॥ १ ०५७ ०४

(७७०)

तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
तरत् स मन्दी धावति ॥ १ ०५८ ०१
उस्रा वेद वसूनाम् मर्तस्य देव्य् अवसः ।
तरत् स मन्दी धावति ॥ १ ०५८ ०२
ध्वस्रयोः पुरुषन्त्योर् आ सहस्राणि दद्महे ।
तरत् स मन्दी धावति ॥ १ ०५८ ०३
आ ययोस् त्रिंशतं तना सहस्राणि च दद्महे ।
तरत् स मन्दी धावति ॥ १ ०५८ ०४

(७७१)

पवस्व गोजिद् अश्वजिद् विश्वजित् सोम रण्यजित् ।
प्रजावद् रत्नम् आ भर ॥ १ ०५१ ०१
पवस्वाङ्गयो अदाभ्यः पवस्वौषधीभ्यः ।
पवस्व धिषणाभ्यः ॥ १ ०५१ ०२
त्वं सोम पवमानो विश्वानि दुरिता तर ।
कविः सीद नि बर्हिषि ॥ १ ०५१ ०३
पवमान स्वर् विदो जायमानो ऽभवो महान् ।
इन्दो विश्वाँ अभीद् असि ॥ १ ०५१ ०४

(७७२)

प्र गायत्रेण गायत पवमानं विचर्षणिम् ।
इन्दुं सहस्रचक्षसम् ॥ १ ०६० ०१
तं त्वा सहस्रचक्षसम् अथो सहस्रभर्णसम् ।
अति वारम् अपाविषुः ॥ १ ०६० ०२
अति वारान् पवमानो असिष्यदत् कलशाँ अभि धावति ।
इन्द्रस्य हार्दि आविशन् ॥ १ ०६० ०३
इन्द्रस्य सोम राधसे शम् पवस्व विचर्षणे ।
प्रजावद् रेत आ भर ॥ १ ०६० ०४

(७७३)

अया वीती परि स्रव यस् त इन्दो मदेष्व् आ ।
अवाहन् नवतीर् नव ॥ १ ०६१ ०१
पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् ।
अध त्यं तुर्वशं यदुम् ॥ १ ०६१ ०२

परि॑ णो॒ अश्व॑म् अ॒श्वविद् गोम॑द् इन्दो हिर॒ण्यवत् ।
क्षरा॑ सह॒स्रिणी॒र् इषः॑ ॥ ९ ०६१ ०३
पव॑मानस्य ते व॒यम् प॒वित्र॑म् अभ्युन्द॒तः ।
स॒ख्ि॒त्वम् आ वृ॑णीमहे ॥ ९ ०६१ ०४
ये ते॑ प॒वित्र॑म् ऊ॒र्मयो॑ ऽभिक्षर॑न्ति॒ धार॑या ।
तेभि॑र् नः सोम मृळय ॥ ९ ०६१ ०५
स नः॑ पुना॒न आ भ॑र र॒यिं वी॒रव॑ती॒म् इष॑म् ।
ईशा॑नः सोम वि॒श्वतः॑ ॥ ९ ०६१ ०६
ए॒तम् उ॒ त्यं दश॒ क्षिपो॑ मृ॒जन्ति॒ सिन्धु॑मातरम् ।
सम् आ॑दि॒त्येभि॑र् अख्यत ॥ ९ ०६१ ०७
सम् इन्द्रे॑णोत वा॒युना॑ सु॒त ए॑ति प॒वित्र॒ आ ।
सं सूर्य॑स्य र॒श्मिभिः॑ ॥ ९ ०६१ ०८
स नो॒ भगा॑य वा॒यवे॑ पू॒ष्णे प॑वस्व मधु॒मान् ।
चारु॑र् मि॒त्रे वरु॑णे च ॥ ९ ०६१ ०९
उ॒च्चा ते॑ जा॒तम् अन्ध॑सो दि॒वि षद् भूम्य् आ द॑दे ।
उ॒ग्रं शर्म॑ महि॒ श्रवः॑ ॥ ९ ०६१ १०
ए॒ना विश्वा॒न्य् अ॒र्य आ द्यु॒म्नानि॑ मानु॒षाणाम् ।
सिषा॑सन्तो वनामहे ॥ ९ ०६१ ११
स न॒ इन्द्रा॑य॒ यज्य॑वे॒ वरु॑णाय म॒रुद्भ्यः॑ ।
व॒रि॒वो॒वित् परि॑ स्रव ॥ ९ ०६१ १२
उपो॒ षु जा॒तम् अ॒तुरं॑ गोभि॒र् भङ्गम् परि॑ष्कृतम् ।
इन्दुं॑ दे॒वा अ॑यासिषुः ॥ ९ ०६१ १३
तम् इद् व॑र्धन्तु नो॒ गिरो॑ व॒त्सं स॑शिश्व॒रीर् इव ।
य इन्द्र॑स्य हृ॒दंसनिः॑ ॥ ९ ०६१ १४
अर्षा॑ णः सोम॒ शं गवे॑ धु॒क्षस्व॑ पिप्यु॒षीम् इष॑म् ।
वर्धा॑ समु॒द्रम् उ॒क्थ्यम् ॥ ९ ०६१ १५
पव॑मानो अजीजनद् दि॒वश् चि॒त्रं न त॑न्य॒तुम् ।
ज्योति॑र् वैश्वान॒रम् बृ॒हत् ॥ ९ ०६१ १६

पवमानस्य ते रसो मदो राजन्न् अदुच्छुनः ।
वि वारम् अव्यम् अर्षति ॥ ९ ०६१ १७
पवमान रसस् तव दक्षो वि राजति द्युमान् ।
ज्योतिर् विश्वं स्वर् दृशे ॥ ९ ०६१ १८
यस् ते मदो वरेण्यस् तेना पवस्वान्धसा ।
देवावीर् अघशंसहा ॥ ९ ०६१ १९
जघ्निर् वृत्रम् अमित्रियं सस्निर् वाजं दिवे-दिवे ।
गोषा उ अश्वसा असि ॥ ९ ०६१ २०
सम्मिश्लो अरुषो भव सूपस्थाभिर् न धेनुभिः ।
सीदञ् छ्येनो न योनिम् आ ॥ ९ ०६१ २१
स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
वव्रिवांसम् महीर् अपः ॥ ९ ०६१ २२
सुवीरासो वयं धना जयेम सोम मीढ्वः ।
पुनानो वर्ध नो गिरः ॥ ९ ०६१ २३
त्वोतासस् तवावसा स्याम वन्वन्त आमुरः ।
सोम व्रतेषु जागृहि ॥ ९ ०६१ २४
अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ९ ०६१ २५
महो नो राय आ भर पवमान जही मृधः ।
रास्वेन्दो वीरवद् यशः ॥ ९ ०६१ २६
न त्वा शतं चन हुतो राधो दित्सन्तम् आ मिनन् ।
यत् पुनानो मखस्यसे ॥ ९ ०६१ २७
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
विश्वा अप द्विषो जहि ॥ ९ ०६१ २८
अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे ।
सासह्याम पृतन्यतः ॥ ९ ०६१ २९
या ते भीमान्य् आयुधा तिग्मानि सन्ति धूर्वणे ।
रक्षा समस्य नो निदः ॥ ९ ०६१ ३०

(७७४)

एते असृग्रम् इन्दवस् तिरः पवित्रम् आशवः ।
विश्वान्य् अभि सौभगा ॥ १ ०६२ ०१
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
तना कृण्वन्तो अर्वते ॥ १ ०६२ ०२
कृण्वन्तो वरिवो गवे ऽभ्य् अर्षन्ति सुष्टुतिम् ।
इळाम् अस्मभ्यं संयतम् ॥ १ ०६२ ०३
असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
श्येनो न योनिम् आसदत् ॥ १ ०६२ ०४
शुभ्रम् अन्धो देववातम् अप्सु धूतो नृभिः सुतः ।
स्वदन्ति गावः पयोभिः ॥ १ ०६२ ०५
आद् ईम् अश्वं न हेतारो ऽशूशुभन्न् अमृताय ।
मध्वो रसं सधमादे ॥ १ ०६२ ०६
यास् ते धारा मधुश्चुतो ऽसृग्रम् इन्द ऊतये ।
ताभिः पवित्रम् आसदः ॥ १ ०६२ ०७
सो अर्षेन्द्राय पीतये तिरो रोमाण्य् अव्यया ।
सीदन् योना वनेष्व् आ ॥ १ ०६२ ०८
त्वम् इन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।
वरिवोविद् घृतम् पयः ॥ १ ०६२ ०९
अयं विचर्षणिर् हितः पवमानः स चेतति ।
हिन्वान आप्यम् बृहत् ॥ १ ०६२ १०
एष वृषा वृषव्रतः पवमानो अशस्तिहा ।
करद् वसूनि दाशुषे ॥ १ ०६२ ११
आ पवस्व सहस्रिणं रयिं गोमन्तम् अश्विनम् ।
पुरुश्चन्द्रम् पुरुस्पृहम् ॥ १ ०६२ १२
एष स्य परि षिच्यते मर्मृज्यमान आयुभिः ।

उरुगायः कविक्रतुः ॥ १ ०६२ १३
सहस्रोतिः शतामघो विमानो रजसः कविः ।
इन्द्राय पवते मदः ॥ १ ०६२ १४
गिरा जात इह स्तुत इन्दुर् इन्द्राय धीयते ।
विर् योना वसताव् इव ॥ १ ०६२ १५
पवमानः सुतो नृभिः सोमो वाजम् इवासरत् ।
चमूषु शक्मनासदम् ॥ १ ०६२ १६
तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे ।
ऋषीणां सप्त धीतिभिः ॥ १ ०६२ १७
तं सोतारो धनस्पृतम् आशुं वाजाय यातवे ।
हरिं हिनोत वाजिनम् ॥ १ ०६२ १८
आविशन् कलशं सुतो विश्वा अर्षन्न् अभि श्रियः ।
शूरो न गोषु तिष्ठति ॥ १ ०६२ १९
आ त इन्दो मदाय कम् पयो दुहन्त्य् आयवः ।
देवा देवेभ्यो मधु ॥ १ ०६२ २०
आ नः सोमम् पवित्र आ सृजता मधुमत्तमम् ।
देवेभ्यो देवश्रुत्तमम् ॥ १ ०६२ २१
एते सोमा असृक्षत गृणानाः श्रवसे महे ।
मदिन्तमस्य धारया ॥ १ ०६२ २२
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
सनद्वाजः परि स्रव ॥ १ ०६२ २३
उत नो गोमतीर् इषो विश्वा अर्ष परिष्टुभः ।
गृणानो जमदग्निना ॥ १ ०६२ २४
पवस्व वाचो अग्रियः सोम चित्राभिर् ऊतिभिः ।
अभि विश्वानि काव्या ॥ १ ०६२ २५
त्वं समुद्रिया अपो ऽग्रियो वाच ईरयन् ।
पवस्व विश्वमेजय ॥ १ ०६२ २६
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।

तुभ्यम् अर्षन्ति सिन्धवः ॥ १ ०६२ २७
प्र ते दिवो न वृष्टयो धारा यन्त्य् असश्चतः ।
अभि शुक्राम् उपस्तिरम् ॥ १ ०६२ २८
इन्द्रायेन्दुम् पुनीतनोग्रं दक्षाय साधनम् ।
ईशानं वीतिराधसम् ॥ १ ०६२ २९
पवमान ऋतः कविः सोमः पवित्रम् आसदत् ।
दधत् स्तोत्रे सुवीर्यम् ॥ १ ०६२ ३०

(७७५)
आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।
अस्मे श्रवांसि धारय ॥ १ ०६३ ०१
इषम् ऊर्जं च पिन्वस इन्द्राय मत्सरिन्तमः ।
चमूष्व् आ नि षीदसि ॥ १ ०६३ ०२
सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् ।
मधुमाꣳ अस्तु वायवे ॥ १ ०६३ ०३
एते असृग्रम् आशवो ऽति ह्वरांसि बभ्रवः ।
सोमा ऋतस्य धारया ॥ १ ०६३ ०४
इन्द्रं वर्धन्तो असुरः कृण्वन्तो विश्वम् आर्यम् ।
अपघ्नन्तो अराव्णः ॥ १ ०६३ ०५
सुता अनु स्वम् आ रजो ऽभ्य् अर्षन्ति बभ्रवः ।
इन्द्रं गच्छन्त इन्दवः ॥ १ ०६३ ०६
अया पवस्व धारया यया सूर्यम् अरोचयः ।
हिन्वानो मानुषीर् अपः ॥ १ ०६३ ०७
अयुक्त सूर एतशम् पवमानो मनाव् अधि ।
अन्तरिक्षेण यातवे ॥ १ ०६३ ०८
उत त्या हरितो दश सूरो अयुक्त यातवे ।
इन्दुर् इन्द्र इति ब्रुवन् ॥ १ ०६३ ०९

परीतो वायवे सुतं गिर इन्द्राय मत्सरम् ।
अव्यो वारेषु सिञ्चत ॥ १ ०६३ १०
पवमान विदा रयिम् अस्मभ्यं सोम दुष्टरम् ।
यो दूणाशो वनुष्यता ॥ १ ०६३ ११
अभ्य् अर्ष सहस्रिणं रयिं गोमन्तम् अश्विनम् ।
अभि वाजम् उत श्रवः ॥ १ ०६३ १२
सोमो देवो न सूर्यो ऽद्रिभिः पवते सुतः ।
दधानः कलशे रसम् ॥ १ ०६३ १३
एते धामान्य् आर्या शुक्रा ऋतस्य धारया ।
वाजं गोमन्तम् अक्षरन् ॥ १ ०६३ १४
सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः ।
पवित्रम् अत्य् अक्षरन् ॥ १ ०६३ १५
प्र सोम मधुमत्तमो राये अर्ष पवित्र आ ।
मदो यो देववीतमः ॥ १ ०६३ १६
तम् ईं मृजन्त्य् आयवो हरिं नदीषु वाजिनम् ।
इन्दुम् इन्द्राय मत्सरम् ॥ १ ०६३ १७
आ पवस्व हिरण्यवद् अश्वावत् सोम वीरवत् ।
वाजं गोमन्तम् आ भर ॥ १ ०६३ १८
परि वाजे न वाजयुम् अव्यो वारेषु सिञ्चत ।
इन्द्राय मधुमत्तमम् ॥ १ ०६३ १९
कविम् मृजन्ति मर्ज्यं धीभिर् विप्रा अवस्यवः ।
वृषा कनिक्रद् अर्षति ॥ १ ०६३ २०
वृषणं धीभिर् असुरं सोमम् ऋतस्य धारया ।
मती विप्राः सम् अस्वरन् ॥ १ ०६३ २१
पवस्व देवायुषग् इन्द्रं गच्छतु ते मदः ।
वायुम् आ रोह धर्मणा ॥ १ ०६३ २२
पवमान नि तोशसे रयिं सोम श्रवाय्यम् ।
प्रियः समुद्रम् आ विश ॥ १ ०६३ २३

अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः ।
नुदस्वादेवयुं जनम् ॥ १ ०६३ २४
पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।
अभि विश्वानि काव्या ॥ १ ०६३ २५
पवमानास आशवः शुभ्रा असृग्रम् इन्दवः ।
घ्नन्तो विश्वा अप द्विषः ॥ १ ०६३ २६
पवमाना दिवस् पर्य् अन्तरिक्षाद् असृक्षत ।
पृथिव्या अधि सानवि ॥ १ ०६३ २७
पुनानः सोम धारयेन्दो विश्वा अप स्रिधः ।
जहि रक्षांसि सुक्रतो ॥ १ ०६३ २८
अपघ्नन् सोम रक्षसोऽभ्य् अर्ष कनिक्रदत् ।
द्युमन्तं शुष्मम् उत्तमम् ॥ १ ०६३ २९
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा ।
इन्दो विश्वानि वार्या ॥ १ ०६३ ३०

(७७६)

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।
वृषा धर्माणि दधिषे ॥ १ ०६४ ०१
वृष्णस् ते वृष्ण्यं शवो वृषा वनं वृषा मदः ।
सत्यं वृषन् वृषेद् असि ॥ १ ०६४ ०२
अश्वो न चक्रदो वृषा सं गा इन्दो सम् अर्वतः ।
वि नो राये दुरो वृधि ॥ १ ०६४ ०३
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
शुक्रासो वीरयाशवः ॥ १ ०६४ ०४
शुम्भमाना ऋतायुभिर् मृज्यमाना गभस्त्योः ।
पवन्ते वारे अव्यये ॥ १ ०६४ ०५
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।

पवन्ताम् आन्तरिक्ष्या ॥ १ ०६४ ०६
पवमानस्य विश्ववित् प्र ते सर्गा असृक्षत ।
सूर्यस्येव न रश्मयः ॥ १ ०६४ ०७
केतुं कृण्वन् दिवस् परि विश्वा रूपाभ्य् अर्षसि ।
समुद्रः सोम पिन्वसे ॥ १ ०६४ ०८
हिन्वानो वाचम् इष्यसि पवमान विधर्मणि ।
अक्रान् देवो न सूर्यः ॥ १ ०६४ ०९
इन्दुः पविष्ट चेतनः प्रियः कवीनाम् मती ।
सृजद् अश्वो रथीर् इव ॥ १ ०६४ १०
ऊर्मिर् यस् ते पवित्र आ देवावीः पर्यक्षरत् ।
सीदन्न् ऋतस्य योनिम् आ ॥ १ ०६४ ११
स नो अर्ष पवित्र आ मदो यो देववीतमः ।
इन्दव् इन्द्राय पीतये ॥ १ ०६४ १२
इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
इन्दो रुचाभि गा इहि ॥ १ ०६४ १३
पुनानो वरिवस् कृध्य् ऊर्जं जनाय गिर्वणः ।
हरे सृजान आशिरम् ॥ १ ०६४ १४
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
द्युतानो वाजिभिर् यतः ॥ १ ०६४ १५
प्र हिन्वानास इन्दवो ऽच्छा समुद्रम् आशवः ।
धिया जूता असृक्षत ॥ १ ०६४ १६
मर्मृजानास आयवो वृथा समुद्रम् इन्दवः ।
अगमन्न् ऋतस्य योनिम् आ ॥ १ ०६४ १७
परि णो याह्य अस्मयुर् विश्वा वसून्य् ओजसा ।
पाहि नः शर्म वीरवत् ॥ १ ०६४ १८
मिमाति वह्निर् एतशः पदं युजान ऋक्वभिः ।
प्र यत् समुद्र आहितः ॥ १ ०६४ १९
आ यद् योनिं हिरण्ययम् आशुर् ऋतस्य सीदति ।

जहात्य् अप्रचेतसः ॥ १ ०६४ २०
अभि वेना अनूषतेयक्षन्ति प्रचेतसः ।
मज्जन्त्य् अविचेतसः ॥ १ ०६४ २१
इन्द्रायेन्दो मरुत्वति पवस्व मधुमत्तमः ।
ऋतस्य योनिम् आसदम् ॥ १ ०६४ २२
तं त्वा विप्रा वचोविदः परि ष्कृण्वन्ति वेधसः ।
सं त्वा मृजन्त्य् आयवः ॥ १ ०६४ २३
रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे ।
पवमानस्य मरुतः ॥ १ ०६४ २४
त्वं सोम विपश्चितम् पुनानो वाचम् इष्यसि ।
इन्दो सहस्रभर्णसम् ॥ १ ०६४ २५
उतो सहस्रभर्णसं वाचं सोम मखस्युवम् ।
पुनान इन्दव् आ भर ॥ १ ०६४ २६
पुनान इन्दव् एषाम् पुरुहूत जनानाम् ।
प्रियः समुद्रम् आ विश ॥ १ ०६४ २७
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
सोमाः शुक्रा गवाशिरः ॥ १ ०६४ २८
हिन्वानो हेतृभिर् यत आ वाजं वाज्य् अक्रमीत् ।
सीदन्तो वनुषो यथा ॥ १ ०६४ २९
ऋधक् सोम स्वस्तये संजग्मानो दिवः कविः ।
पवस्व सूर्यो दृशे ॥ १ ०६४ ३०

(७७७)

हिन्वन्ति सूरम् उस्रयः स्वसारो जामयस् पतिम् ।
महाम् इन्दुम् महीयुवः ॥ १ ०६५ ०१
पवमान रुचा-रुचा देवो देवेभ्यस् परि ।
विश्वा वसून्य् आ विश ॥ १ ०६५ ०२

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतम् ॥ १ ०६५ ०३
वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
पवमान स्वाध्यः ॥ १ ०६५ ०४
आ पवस्व सुवीर्यम् मन्दमानः स्वायुध ।
इहो ष्व् ऐन्दव् आ गहि ॥ १ ०६५ ०५
यद् अद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः ।
द्रुणा सधस्थम् अश्नुषे ॥ १ ०६५ ०६
प्र सोमाय व्यश्ववत् पवमानाय गायत ।
महे सहस्रचक्षसे ॥ १ ०६५ ०७
यस्य वर्णम् मधुश्चुतं हरिं हिन्वन्त्य् अद्रिभिः ।
इन्दुम् इन्द्राय पीतये ॥ १ ०६५ ०८
तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः ।
सखित्वम् आ वृणीमहे ॥ १ ०६५ ०९
वृषा पवस्व धारया मरुत्वते च मत्सरः ।
विश्वा दधान ओजसा ॥ १ ०६५ १०
तं त्वा धर्तारम् ओण्यो ३ : पवमान स्वर्दृशम् ।
हिन्वे वाजेषु वाजिनम् ॥ १ ०६५ ११
अया चित्तो विपानया हरिः पवस्व धारया ।
युजं वाजेषु चोदय ॥ १ ०६५ १२
आ न इन्दो महीम् इषम् पवस्व विश्वदर्शतः ।
अस्मभ्यं सोम गातुवित् ॥ १ ०६५ १३
आ कलशा अनूषतेन्दो धाराभिर् ओजसा ।
एन्द्रस्य पीतये विश ॥ १ ०६५ १४
यस्य ते मद्यं रसं तीव्रं दुहन्त्य् अद्रिभिः ।
स पवस्वाभिमातिहा ॥ १ ०६५ १५
राजा मेधाभिर् ईयते पवमानो मनाव् अधि ।
अन्तरिक्षेण यातवे ॥ १ ०६५ १६

आ न॑ इन्दो शत॒ग्विन॑ं गवा॒म् पोष॑ं स्वश्व्य॑म् ।
वहा॒ भगा॑त्तिम् ऊ॒तये॑ ॥ १ ०६५ १७
आ नः॑ सोम सहो॒ जुवो॑ रू॒पं न वर्च॑से भर ।
सु॒ष्वा॒णो दे॒ववी॑तये ॥ १ ०६५ १८
अषा॑ सोम द्यु॒मत्त॑मो ऽभि द्रोणा॑नि रोरुवत् ।
सीद॑न् छ्ये॒नो न यो॒नि॒म् आ ॥ १ ०६५ १९
अ॒प्सा इ॑न्द्रा॑य वा॒यवे॒ वरु॑णाय म॒रुद्भ्यः॑ ।
सोमो॑ अर्षति॒ विष्ण॑वे ॥ १ ०६५ २०
इष॑ं तो॒काय॑ नो॒ दध॒द् अ॒स्मभ्य॑ं सोम वि॒श्वतः॑ ।
आ प॑वस्व सह॒स्रिण॑म् ॥ १ ०६५ २१
ये सोमा॑सः परा॒वति॒ ये अ॒र्वा॒वति॑ सु॒न्वि॒रे ।
ये वा॒दः श॒र्य॑णाव॑ति ॥ १ ०६५ २२
य आ॑र्जी॒कि॒षु॒ कृ॒त्व॒सु॒ ये मध्ये॑ प॒स्त्या॒नाम् ।
ये वा॒ जने॑षु पञ्चसु॑ ॥ १ ०६५ २३
ते नो॑ वृ॒ष्टिं दि॒वस् परि॒ पव॑न्ताम् आ सु॒वीर्य॑म् ।
सु॒वा॒ना दे॒वास॒ इन्द॑वः ॥ १ ०६५ २४
पव॑ते ह॒र्य॒तो हरि॑र् गृ॒णा॒नो ज॒मद॑ग्निना ।
हि॒न्वा॒नो गोर् अधि॑ त्व॒चि ॥ १ ०६५ २५
प्र शु॒क्रासो॑ वयो॒जुवो॑ हिन्वा॒नासो॒ न स॑प्त॑यः ।
श्री॒णा॒ना अ॒प्सु मृ॑ञ्जत ॥ १ ०६५ २६
तं त्वा॑ सु॒तेष्व् आ॒भुवो॑ हिन्वि॒रे दे॒वता॑तये ।
स प॑वस्वा॒नया॑ रु॒चा ॥ १ ०६५ २७
आ ते॒ दक्ष॑म् मयो॒भुव॑ं वह्नि॑म् अ॒द्या वृ॑णीमहे ।
पान्त॒म् आ पु॑रुस्पृ॒ह॑म् ॥ १ ०६५ २८
आ म॒न्द्रम् आ वरे॑ण्यम् आ वि॒प्रम् आ म॑नी॒षि॑णम् ।
पान्त॒म् आ पु॑रुस्पृ॒ह॑म् ॥ १ ०६५ २९
आ र॒यिम् आ सु॒चे॒तु॒न॒म् आ सु॑क्रतो त॒नूष्व् आ ।
पान्त॒म् आ पु॑रुस्पृ॒ह॑म् ॥ १ ०६५ ३०

(७७८)

पव॑स्व विश्वचर्षणे ऽभि विश्वा॑नि काव्या॑ ।
सखा॒ सखि॑भ्य ईड्यः॑ ॥ ९ ०६६ ०१
ताभ्या॑ विश्व॑स्य राजसि॒ ये प॑वमान॒ धाम॑नी ।
प्र॒तीची॑ सो॑म॒ तस्थतुः॑ ॥ ९ ०६६ ०२
परि॒ धामा॑नि॒ यानि॑ ते॒ त्वं सो॑मासि॒ विश्व॑तः॑ ।
पव॑मान ऋ॒तुभिः॑ कवे ॥ ९ ०६६ ०३
पव॑स्व जनयन्न् इषो॑ ऽभि विश्वा॑नि वार्या॑ ।
सखा॒ सखि॑भ्य ऊ॒तये॑ ॥ ९ ०६६ ०४
तव॑ शु॒क्रासो॑ अ॒र्चयो॑ दि॒वस् पृ॒ष्ठे वि त॑न्वते ।
प॒वित्रं॑ सोम॒ धाम॑भिः ॥ ९ ०६६ ०५
तवे॒मे स॒प्त सिन्ध॑वः प्र॒शिषं॑ सोम सिस्रते ।
तुभ्यं॑ धावन्ति धे॒नवः॑ ॥ ९ ०६६ ०६
प्र सो॑म याहि॒ धार॑या सु॒त इन्द्रा॑य मत्स॒रः ।
दधा॑नो अक्षि॑ति॒ श्रवः॑ ॥ ९ ०६६ ०७
सम् उ॑ त्वा धी॒भिर् अ॑स्वरन् हि॒न्वतीः॑ स॒प्त जा॒मयः॑ ।
विप्र॑म् आ॒जा वि॒वस्व॑तः ॥ ९ ०६६ ०८
मृ॒जन्ति॑ त्वा॒ सम् अ॒ग्रुवो ऽव्ये॑ जी॒राव् अधि॒ ष्वणि॑ ।
रे॒भो यद् अ॒ज्यसे॒ वने॑ ॥ ९ ०६६ ०९
पव॑मानस्य ते कवे॒ वाजि॒न् सर्गा॑ असृक्षत ।
अर्व॑न्तो न श्रव॑स्यवः॑ ॥ ९ ०६६ १०
अच्छा॒ कोश॑म् मधु॒श्चुत॑म् असृ॒ग्रं वारे॑ अ॒व्यये॑ ।
अवा॑वशन्त धी॒तयः॑ ॥ ९ ०६६ ११
अच्छा॑ समु॒द्रम् इन्द॑वो ऽस्तं॑ गावो॒ न धे॒नवः॑ ।
अग्म॑न्न् ऋ॒तस्य॒ योनि॑म् आ ॥ ९ ०६६ १२
प्र ण॑ इन्दो म॒हे रण॒ आपो॑ अर्षन्ति॒ सिन्ध॑वः ।

यद् गोभिर् वासयिष्यसे ॥ १ ०६६ १३
अस्य ते सख्ये वयम् इयक्षन्तस् त्वोतयः ।
इन्दो सखित्वम् उश्मसि ॥ १ ०६६ १४
आ पवस्व गविष्टये महे सोम नृचक्षसे ।
एन्द्रस्य जठरे विश ॥ १ ०६६ १५
महाꣳ असि सोम ज्येष्ठ उग्राणाम् इन्द ओजिष्ठः ।
युध्वा सञ् छश्वज् जिगेथ ॥ १ ०६६ १६
य उग्रेभ्यश् चिद् ओजीयाञ् छूरेभ्यश् चिच् छूरतरः ।
भूरिदाभ्यश् चिन् मंहीयान् ॥ १ ०६६ १७
त्वं सोम सूर एषस् तोकस्य साता तनूनाम् ।
वृणीमहे सख्याय वृणीमहे युज्याय ॥ १ ०६६ १८
अग्न आयूंषि पवस आ सुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ १ ०६६ १९
अग्निर् ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तम् ईमहे महागयम् ॥ १ ०६६ २०
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
दधद् रयिम् मयि पोषम् ॥ १ ०६६ २१
पवमानो अति स्रिधो ऽभ्य् अर्षति सुष्टुतिम् ।
सूरो न विश्वदर्शतः ॥ १ ०६६ २२
स मर्मृजान आयुभिः प्रयस्वान् प्रयसे हितः ।
इन्दुर् अत्यो विचक्षणः ॥ १ ०६६ २३
पवमान ऋतम् बृहच् छुक्रं ज्योतिर् अजीजनत् ।
कृष्णा तमांसि जङ्घनत् ॥ १ ०६६ २४
पवमानस्य जङ्घ्नतो हरेश् चन्द्रा असृक्षत ।
जीरा अजिरशोचिषः ॥ १ ०६६ २५
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
हरिश्चन्द्रो मरुद्गणः ॥ १ ०६६ २६
पवमानो व्य् अश्नवद् रश्मिभिर् वाजसातमः ।

दधत् स्तोत्रे सुवीर्यम् ॥ १ ०६६ २७
प्र सुवान इन्दुर् अक्षाः पवित्रम् अत्य् अव्ययम् ।
पुनान इन्दुर् इन्द्रम् आ ॥ १ ०६६ २८
एष सोमो अधि त्वचि गवां क्रीळत्य् अद्रिभिः ।
इन्द्रम् मदाय जोहुवत् ॥ १ ०६६ २९
यस्य ते द्युम्नवत् पयः पवमानाभृतं दिवः ।
तेन नो मृळ जीवसे ॥ १ ०६६ ३०

(७७१)
त्वं सोमासि धारयुर् मन्द्र ओजिष्ठो अध्वरे ।
पवस्व मंहयद्रयिः ॥ १ ०६७ ०१
त्वं सुतो नृमादनो दधन्वान् मत्सरिन्तमः ।
इन्द्राय सूरिर् अन्धसा ॥ १ ०६७ ०२
त्वं सुष्वाणो अद्रिभिर् अभ्य् अर्ष कनिक्रदत् ।
द्युमन्तं शुष्मम् उत्तमम् ॥ १ ०६७ ०३
इन्दुर् हिन्वानो अर्षति तिरो वाराण्य् अव्यया ।
हरिर् वाजम् अचिक्रदत् ॥ १ ०६७ ०४
इन्दो व्य् अव्यम् अर्षसि वि श्रवांसि वि सौभगा ।
वि वाजान् सोम गोमतः ॥ १ ०६७ ०५
आ न इन्दो शतग्विनं रयिं गोमन्तम् अश्विनम् ।
भरा सोम सहस्रिणम् ॥ १ ०६७ ०६
पवमानास इन्दवस् तिरः पवित्रम् आशवः ।
इन्द्रं यामेभिर् आशत ॥ १ ०६७ ०७
ककुहः सोम्यो रस इन्दुर् इन्द्राय पूर्व्यः ।
आयुः पवत आयवे ॥ १ ०६७ ०८
हिन्वन्ति सूरम् उस्रयः पवमानम् मधुश्चुतम् ।
अभि गिरा सम् अस्वरन् ॥ १ ०६७ ०९

अविता नो अजाश्वः पूषा यामनि-यामनि ।
आ भक्षत् कन्यासु नः ॥ १ ०६७ १०
अयं सोमः कपर्दिने घृतं न पवते मधु ।
आ भक्षत् कन्यासु नः ॥ १ ०६७ ११
अयं त आघृणे सुतो घृतं न पवते शुचि ।
आ भक्षत् कन्यासु नः ॥ १ ०६७ १२
वाचो जन्तुः कवीनाम् पवस्व सोम धारया ।
देवेषु रत्नधा असि ॥ १ ०६७ १३
आ कलशेषु धावति श्येनो वर्म वि गाहते ।
अभि द्रोणा कनिक्रदत् ॥ १ ०६७ १४
परि प्र सोम ते रसो ऽसर्जि कलशे सुतः ।
श्येनो न तक्तो अर्षति ॥ १ ०६७ १५
पवस्व सोम मन्दयन्न् इन्द्राय मधुमत्तमः ॥ १ ०६७ १६
असृग्रन् देववीतये वाजयन्तो रथा इव ॥ १ ०६७ १७
ते सुतासो मदिन्तमाः शुक्रा वायुम् असृक्षत ॥ १ ०६७ १८
ग्राव्णा तुन्नो अभिष्टुतः पवित्र सोम गच्छसि ।
दधत् स्तोत्रे सुवीर्यम् ॥ १ ०६७ १९
एष तुन्नो अभिष्टुतः पवित्रम् अति गाहते ।
रक्षोहा वारम् अव्ययम् ॥ १ ०६७ २०
यद् अन्ति यच् च दूरके भयं विन्दति माम् इह ।
पवमान वि तज् जहि ॥ १ ०६७ २१
पवमानः सो अद्य नः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु नः ॥ १ ०६७ २२
यत् ते पवित्रम् अर्चिष्य् अग्ने वितंतम् अन्तर् आ ।
ब्रह्म तेन पुनीहि नः ॥ १ ०६७ २३
यत् ते पवित्रम् अर्चिवद् अग्ने तेन पुनीहि नः ।
ब्रह्मसवैः पुनीहि नः ॥ १ ०६७ २४
उभाभ्यां देव सवितः पवित्रेण सवेन च ।

माम् पुनीहि विश्वतः ॥ १ ०६७ २५
त्रिभिष् ट्वं देव सवितर् वर्षिष्ठैः सोम धामभिः ।
अग्ने दक्षैः पुनीहि नः ॥ १ ०६७ २६
पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥ १ ०६७ २७
प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिर् अंशुभिः ।
देवेभ्य उत्तमं हविः ॥ १ ०६७ २८
उप प्रियम् पनिप्नतं युवानम् आहुतीवृधम् ।
अगन्म बिभ्रतो नमः ॥ १ ०६७ २९
अलाय्यस्य परशुर् ननाश तम् आ पवस्व देव सोम ।
आखुं चिद् एव देव सोम ॥ १ ०६७ ३०
यः पावमानीर् अध्येत्य् ऋषिभिः सम्भृतं रसम् ।
सर्वं स पूतम् अश्नाति स्वदितम् मातरिश्वना ॥ १ ०६७ ३१
पावमानीर् यो अध्येत्य् ऋषिभिः सम्भृतं रसम् ।
तस्मै सरस्वती दुहे क्षीरं सर्पिर् मधूदकम् ॥ १ ०६७ ३२

(७८०)

प्र देवम् अच्छा मधुमन्त इन्दवो ऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतम् उस्रिया निर्णिजं धिरे ॥ १ ०६८ ०१
स रोरुवद् अभि पूर्वा अचिक्रदद् उपारुहः श्रथयन् स्वादते हरिः ।
तिरः पवित्रम् परियन्न् उरु ज्रयो नि शर्याणि दधते देव आ वरम् ॥ १ ०६८ ०२
वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वद् अक्षिता ।
मही अपारे रजसी विवेविदद् अभिव्रजन्न् अक्षितम् पाज आ ददे ॥ १ ०६८ ०३
स मातरा विचरन् वाजयन्न् अपः प्र मेधिरः स्वधया पिन्वते पदम् ।
अंशुर् यवेन पिपिशे यतो नृभिः सं जामिभिर् नसते रक्षते शिरः ॥ १ ०६८ ०४
सं दक्षेण मनसा जायते कविर् ऋतस्य गर्भो निहितो यमा परः ।
यूना ह सन्ता प्रथमं वि जज्ञतुर् गुहा हितं जनिम नेमम् उद्यतम् ॥ १ ०६८ ०५

म॒न्द्रस्य॑ रू॒पं वि॑विदुर् मनी॒षिणः॑ श्ये॒नो यद् अन्धो॒ अभ॑रत् परा॒वतः॑ ।
तम् म॑र्जयन्त सु॒वृधं॑ न॒दीष्व् आꣳ उ॒शन्त॑म् अं॒शुम् प॑रि॒यन्त॑म् ऋ॒ग्मिय॑म् ॥ ९ ०६८ ०६
त्वाम् मृ॑जन्ति॒ दश॒ योष॑णः सु॒तं सोम॒ ऋषि॑भिर् म॒तिभि॑र् धी॒तिभि॑र् हि॒तम् ।
अव्यो॒ वारे॑भिर् उ॒त दे॒वहू॑तिभि॒र् नृभि॑र् य॒तो वाज॒म् आ द॑र्षि सा॒तये॑ ॥ ९ ०६८ ०७
प॒रि॒प्र॒यन्तं॑ व॒य्यं सुषं॒सदं॒ सोम॑म् मनी॒षा अ॒भ्य् अनूषत॒ स्तुभः॑ ।
यो धार॑या॒ मधु॑माꣳ ऊ॒र्मिणा॑ दि॒व इय॑र्ति॒ वाचं॑ रयि॒षाळ् अम॑र्त्यः ॥ ९ ०६८ ०८
अ॒यं दि॒व इ॑यर्ति॒ विश्व॒म् आ रजः॒ सोमः॑ पुना॒नः क॒लशे॑षु सीदति ।
अ॒द्भिर् गोभि॑र् मृज्यते॒ अद्रि॑भिः सु॒तः पु॑ना॒न इन्दु॒र् वरि॑वो विदत् प्रि॒यम् ॥ ९ ०६८ ०९
ए॒वा नः॑ सोम परिषि॒च्यमा॑नो॒ वयो॒ दध॑च् चि॒त्रत॑मम् पवस्व ।
अ॒द्वे॒षे द्यावा॑पृथि॒वी हु॑वेम॒ देवा॑ ध॒त्त र॒यिम् अ॒स्मे सु॒वीर॑म् ॥ ९ ०६८ १०

(७८१)

इषु॒र् न धन्व॒न् प्रति॑ धीयते म॒तिर् व॒त्सो न मा॒तुर् उप॑ स॒र्ज्य् ऊध॑नि ।
उ॒रुधा॑रेव दुहे॒ अग्र॑ आय॒त्य् अस्य॑ व्र॒तेष्व् अपि॒ सोम॑ इष्यते ॥ ९ ०६९ ०१
उपो॑ म॒तिः पृ॒च्यते॑ सि॒च्यते॒ मधु॑ म॒न्द्राज॑नी चोदते अ॒न्तर् आ॒सनि॑ ।
पव॑मानः संत॒निः प्र॑घ्न॒ताम् इ॑व॒ मधु॑मान् द्र॒प्सः परि॒ वार॑म् अर्षति ॥ ९ ०६९ ०२
अव्ये॑ वधू॒युः प॑वते॒ परि॑ त्व॒चि श्र॑थ्नी॒ते न॒प्तीर् अदि॑तेर् ऋ॒तं य॒ते ।
हरि॑र् अक्रान् यज॒तः सं॑य॒तो मदो॑ नृ॒म्णा शिशा॑नो महि॒षो न शो॑भते ॥ ९ ०६९ ०३
उ॒क्षा मि॑माति॒ प्रति॑ यन्ति धे॒नवो॑ दे॒वस्य॑ दे॒वीर् उप॑ यन्ति निष्कृ॒तम् ।
अत्य् अ॑क्रमी॒द् अर्जु॑नं॒ वार॑म् अ॒व्यय॒म् अत्कं॒ न नि॒क्तम् परि॒ सोमो॑ अव्यत ॥ ९ ०६९ ०४
अमृ॑क्तेन॒ रुश॑ता॒ वास॑सा॒ हरि॒र् अम॑र्त्यो निर्णिजा॒नः परि॑ व्यत ।
दि॒वस् पृ॒ष्ठम् ब॒र्हणा॑ नि॒र्णिजे॑ कृतोप॒स्तर॑णं च॒म्वोर् नभ॒स्मय॑म् ॥ ९ ०६९ ०५
सूर्य॑स्येव र॒श्मयो॑ द्रावयि॒त्नवो॑ मत्स॒रासः॑ प्र॒सुपः॑ सा॒कम् ई॑रते ।
तन्तुं॑ त॒तम् परि॒ सर्गा॑स आ॒शवो॒ नेन्द्रा॑द् ऋ॒ते प॑वते॒ धाम॒ किं च॒न ॥ ९ ०६९ ०६
सिन्धो॑र् इव प्रव॒णे नि॒म्न आ॒शवो॒ वृष॑च्युता॒ मदा॑सो गा॒तुम् आ॑शत ।

शं नो॑ निवे॒शे द्वि॒पदे॒ चतु॑ष्पदे ऽ॒स्मे वाजाः॑ सोम तिष्ठन्तु कृ॒ष्टयः॑ ॥ ९ ०६९ ०७
आ नः॑ पवस्व॒ वसु॑म॒द् धिर॑ण्यव॒द् अश्वा॑व॒द् गोम॒द् यव॑मत् सु॒वीर्य॑म् ।
यू॒यं हि सो॑म पि॒तरो॒ मम॒ स्थन॑ दि॒वो मू॒र्धानः॒ प्रस्थि॑ता वय॒स्कृतः॑ ॥ ९ ०६९ ०८
ए॒ते सोमाः॒ पव॑मानास॒ इन्द्रं॒ रथा॑ इव॒ प्र य॑युः सा॒तिम् अच्छ॑ ।
सु॒ताः प॒वित्र॒म् अति॑ य॒न्त्य् अव्यं॑ हि॒त्वी व॒व्रिं ह॒रितो॑ वृ॒ष्टिम् अच्छ॑ ॥ ९ ०६९ ०९
इन्द॒व् इन्द्रा॑य बृह॒ते प॑वस्व सुमृळी॒को अ॑नव॒द्यो रि॒शादाः॑ ।
भरा॑ च॒न्द्राणि॑ गृण॒ते वसू॑नि दे॒वैर् द्या॑वापृथिवी॒ प्राव॑तं नः ॥ ९ ०६९ १०

(७८२)
त्रिर् अ॑स्मै स॒प्त धे॒नवो॑ दुदुह्रे स॒त्याम् आ॒शिर॑म् पू॒र्व्ये व्योमनि ।
च॒त्वार्य् अ॒न्या भुव॑नानि नि॒र्णिजे॒ चारू॑णि चक्रे॒ यद् ऋ॒तैर् अव॑र्धत ॥ ९ ०७० ०१
स भिक्ष॑माणो अ॒मृत॑स्य॒ चारु॑ण उ॒भे द्यावा॒ काव्ये॑ना॒ वि श॑श्रथे ।
तेजि॑ष्ठा अ॒पो मं॒हना॒ परि॑ व्यत॒ यदी॑ दे॒वस्य॒ श्रव॑सा॒ सदो॑ वि॒दुः ॥ ९ ०७० ०२
ते अ॑स्य सन्तु के॒तवो ऽ॑मृत्य॒वो ऽ॑दाभ्यासो ज॒नुषी॑ उ॒भे अनु॑ ।
येभि॑र् नृ॒म्णा च॑ दे॒व्या च पुन॒त आद् इद् राजा॑नम् म॒नना॑ अगृभ्णत ॥ ९ ०७० ०३
स मृ॒ज्यमा॑नो द॒शभिः॑ सु॒कर्म॑भिः॒ प्र म॑ध्य॒मासु॑ मा॒तृषु॑ प्र॒मे सचा॑ ।
व्र॒तानि॑ पा॒नो अ॒मृत॑स्य॒ चारु॑ण उ॒भे नृ॒चक्षा॒ अनु॑ पश्यते॒ विशौ॑ ॥ ९ ०७० ०४
स म॑र्मृजा॒न इ॑न्द्रि॒याय॒ धाय॑स॒ ओभे अ॒न्ता रोद॑सी हर्षते हि॒तः ।
वृषा॒ शुष्मे॑ण बाधते॒ वि दु॑र्म॒तीर् आ॒देदि॑शानः शर्य॒हेव॑ शु॒रुधः॑ ॥ ९ ०७० ०५
स मा॒तरा॒ न ददृ॑शान उ॒स्रियो॒ नान॑दद् एति म॒रुता॑म् इव स्व॒नः ।
जा॒नन्न् ऋ॒तम् प्र॑थ॒मं यत् स्वर्ण॒रम् प्रश॑स्तये॒ कम् अ॑वृणीत सु॒क्रतुः॑ ॥ ९ ०७० ०६
रु॒वति॑ भी॒मो वृ॑ष॒भस् त॑वि॒ष्यया॒ शृङ्गे॒ शिशा॑नो॒ हरि॑णी विचक्ष॒णः ।
आ योनिं॒ सोमः॒ सुकृ॑तं॒ नि षी॑दति ग॒व्ययी॒ त्वग् भ॑वति नि॒र्णिग् अ॒व्ययी॑ ॥ ९ ०७० ०७
शुचिः॑ पुना॒नस् त॒न्वम् अरे॒पस॒म् अव्ये॒ हरि॒र् न्य् अधाविष्ट॒ सान॑वि ।
जुष्टो॑ मि॒त्राय॒ वरु॑णाय वा॒यवे॑ त्रि॒धातु॒ मधु॑ क्रियते सु॒कर्म॑भिः ॥ ९ ०७० ०८
पव॑स्व सोम दे॒ववी॑तये॒ वृषेन्द्र॑स्य॒ हार्दि॑ सोम॒धान॒म् आ वि॑श ।
पु॒रा नो॑ बा॒धाद् दु॑रि॒ताति॑ पारय क्षेत्र॒विद् धि दिश॒ आहा॑ विपृच्छ॒ते ॥ ९ ०७० ०९

हितो न सप्तिर् अभि वाजम् अर्षेन्द्रस्येन्दो जठरम् आ पवस्व ।
नावा न सिन्धुम् अति पर्षि विद्वाञ् छूरो न युध्यन्न् अव नो निद स्पः ॥ ९ ०७० १०

(७८३)

आ दक्षिणा सृज्यते शुष्म्य् आ ३ सदं वेति द्रुहो रक्षसः पाति जागृविः ।
हरिर् ओपशं कृणुते नभस् पय उपस्तिरे चम्वो ३ र् ब्रह्म निर्णिजे ॥ ९ ०७१ ०१
प्र कृष्टिहेव शूष एति रोरुवद् असुर्य १ं वर्णं नि रिणीते अस्य तम् ।
जहाति वव्रिम् पितुर् एति निष्कृतम् उपप्रुतं कृणुते निर्णिजं तना ॥ ९ ०७१ ०२
अद्रिभिः सुतः पवते गभस्त्योर् वृषायते नभसा वेपते मती ।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥ ९ ०७१ ०३
परि द्युक्षं सहसः पर्वतावृधम् मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम् ।
आ यस्मिन् गावः सुहुताद ऊधनि मूर्धञ् छ्रीणन्त्य् अग्रियं वरीमभिः ॥ ९ ०७१ ०४
सम् ई रथं न भुरिजोर् अहेषत दश स्वसारो अदितिर् उपस्थ आ ।
जिगाद् उप ज्रयति गोर् अपीच्यम् पदं यद् अस्य मतुथा अजीजनन् ॥ ९ ०७१ ०५
श्येनो न योनिं सदनं धिया कृतं हिरण्ययम् आसदं देव एषति ।
ए रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाꣳ अप्य् एति यज्ञियः ॥ ९ ०७१ ०६
परा व्यक्तो अरुषो दिवः कविर् वृषा त्रिपृष्ठो अनविष्ट गा अभि ।
सहस्रणीतिर् यतिः परायती रेभो न पूर्वीर् उषसो वि राजति ॥ ९ ०७१ ०७
त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत् समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥ ९ ०७१ ०८
उक्षेव यूथा परियन्न् अरावीद् अधि त्विषीर् अधित सूर्यस्य ।
दिव्यः सुपर्णो ऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥ ९ ०७१ ०९

(७८४)

हरिम् मृजन्त्य् अरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।
उद् वाचम् ईरयति हिन्वते मती पुरुष्टुतस्य कति चित् परिप्रियः ॥ ९ ०७२ ०१

साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यद् आदुहुः ।
यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर् दशभिः काम्यम् मधु ॥ १ ०७२ ०२
अरममाणो अत्य् एति गा अभि सूर्यस्य प्रियं दुहितुस् तिरो रवम् ।
अन्व् अस्मै जोषम् अभरद् विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥ १ ०७२ ०३
नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर् गवाम् प्रदिव इन्दुर् ऋत्वियः ।
पुरंधिवान् मनुषो यज्ञसाधनः शुचिर् धिया पवते सोम इन्द्र ते ॥ १ ०७२ ०४
नृबाहुभ्यां चोदितो धारया सुतो ऽनुष्वधम् पवते सोम इन्द्र ते ।
आप्राः क्रतून् सम् अजैर् अध्वरे मतीर् वेर् न द्रुषच् चम्वो ३ र् आसदद् धरिः ॥ १ ०७२ ०५
अंशुं दुहन्ति स्तनयन्तम् अक्षितं कविं कवयो ऽपसो मनीषिणः ।
सम् ई गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ॥ १ ०७२ ०६
नाभा पृथिव्या धरुणो महो दिवो३ ऽपाम् ऊर्मौ सिन्धुष्व् अन्तर् उक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥ १ ०७२ ०७
स तू पवस्व परि पार्थिवं रज स्तोत्रे शिक्षन्न् आधून्वते च सुक्रतो ।
मा नो निर् भाग् वसुनः सादनस्पृशो रयिम् पिशङ्गम् बहुलं वसीमहि ॥ १ ०७२ ०८
आ तू न इन्दो शतदात्व् अश्व्यं सहस्रदातु पशुमद् धिरण्यवत् ।
उप मास्व बृहती रेवतीर् इषो ऽधि स्तोत्रस्य पवमान नो गहि ॥ १ ०७२ ०९

(७८५)

स्रक्वे द्रप्सस्य धमतः सम् अस्वरन्न् ऋतस्य योना सम् अरन्त नाभयः ।
त्रीन् स मूर्ध्नो असुरश् चक्र आरभे सत्यस्य नावः सुकृतम् अपीपरन् ॥ १ ०७३ ०१
सम्यक् सम्यञ्चो महिषा अहेषत सिन्धोर् ऊर्माव् अधि वेना अवीविपन् ।
मधोर् धाराभिर् जनयन्तो अर्कम् इत् प्रियाम् इन्द्रस्य तन्वम् अवीवृधन् ॥ १ ०७३ ०२
पवित्रवन्तः परि वाचम् आसते पितैषाम् प्रत्नो अभि रक्षति व्रतम् ।
महः समुद्रं वरुणस् तिरो दधे धीरा इच् छेकुर् धरुणेष्व् आरभम् ॥ १ ०७३ ०३

सहस्रधारे ऽव ते सम् अस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
अस्य स्पशो न नि मिषन्ति भूर्णयः पदे-पदे पाशिनः सन्ति सेतवः ॥ ९ ०७३ ०४
पितुर् मातुर् अध्य् आ ये समस्वरन्न् ऋचा शोचन्तः संदहन्तो अव्रतान् ।
इन्द्रद्विष्टाम् अप धमन्ति मायया त्वचम् असिक्नीम् भूमनो दिवस् परि ॥ ९ ०७३ ०५
प्रत्नान् मानाद् अध्य् आ ये समस्वरञ् छ्लोकयन्त्रासो रभसस्य मन्तवः ।
अपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतः ॥ ९ ०७३ ०६
सहस्रधारे वितते पवित्र आ वाचम् पुनन्ति कवयो मनीषिणः ।
रुद्रास एषाम् इषिरासो अद्रुह स्पशः स्वञ्चः सुदृशो नृचक्षसः ॥ ९ ०७३ ०७
ऋतस्य गोपा न दभाय सुक्रतुस् त्री ष पवित्रा हृद्य् अ ३ न्तर् आ दधे ।
विद्वान् स विश्वा भुवनाभि पश्यत्य् अवाजुष्टान् विध्यति कर्ते अव्रतान् ॥ ९ ०७३ ०८
ऋतस्य तन्तुर् वितनः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।
धीराश् चित् तत् समिनक्षन्त आशतात्रा कर्तम् अव पदात्य् अप्रभुः ॥ ९ ०७३ ०९

(७८६)

शिशुर् न जातो ऽव चक्रदद् वने स्व ३ र् यद् वाज्य् अरुषः सिषासति ।
दिवो रेतसा सचते पयोवृधा तम् ईमहे सुमती शर्म सप्रथः ॥ ९ ०७४ ०१
दिवो य स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः ।
सेमे मही रोदसी यक्षद् आवृता समीचीने दाधार सम् इषः कविः ॥ ९ ०७४ ०२
महि प्सरः सुकृतं सोम्यम् मधुर्वी गव्यूतिर् अदितिर् ऋतं यते ।
ईशे यो वृष्टेर् इत उस्रियो वृषापां नेता य इतौउतिर् ऋग्मियः ॥ ९ ०७४ ०३
आत्मन्वन् नभो दुह्यते घृतम् पय ऋतस्य नाभिर् अमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितम् अव मेहन्ति पेरवः ॥ ९ ०७४ ०४
अरावीद् अंशुः सचमान ऊर्मिणा देवाव्य ३ म् मनुषे पिन्वति त्वचम् ।
दधाति गर्भम् अदितिर् उपस्थ आ येन तोकं च तनयं च धामहे ॥ ९ ०७४ ०५
सहस्रधारे ऽव ता असश्चतस् तृतीये सन्तु रजसि प्रजावतीः ।
चतस्रो नाभो निहिता अवो दिवो हविर् भरन्त्य् अमृतं घृतश्चुतः ॥ ९ ०७४ ०६
श्वेतं रूपं कृणुते यत् सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।

धि॒या शमी॑ सचते॒ सेम् अ॒भि प्र॒वद् दि॒वस् कव॑न्ध॒म् अव॑ दर्षद् उ॒द्रिण॑म् ॥ ९ ०७४ ०७
अध॑ श्वे॒तं क॒लशं॒ गोभि॑र् अ॒क्तं कार्ष्म॒न्न् आ वा॒ज्य् अक्रमीत् सस॒वान् ।
आ हि॑न्विरे॒ मन॑सा देव॒यन्तः॑ क॒क्षीव॑ते श॒तहि॑माय॒ गोना॑म् ॥ ९ ०७४ ०८
अ॒द्भिः सो॑म पपृचा॒नस्य॑ ते॒ रसो ऽव्यो॒ वारं॒ वि प॑वमान धावति ।
स मृ॒ज्यमा॑नः क॒विभि॑र् मदिन्तम॒ स्वद॒स्वेन्द्रा॑य पवमान पी॒तये॑ ॥ ९ ०७४ ०९

(७८७)

अ॒भि प्रि॒याणि॑ पवते॒ चनो॑हितो॒ नामा॑नि य॒ह्वो अधि॒ येषु॒ वर्ध॑ते ।
आ सूर्य॑स्य बृह॒तो बृ॒हन्न् अधि॒ रथं॒ विष्व॑ञ्चम् अरुहद् विचक्ष॒णः ॥ ९ ०७५ ०१
ऋ॒तस्य॑ जि॒ह्वा प॑वते॒ मधु॑ प्रि॒यं व॒क्ता पति॑र् धि॒यो अ॒स्या अदा॑भ्यः ।
दधा॑ति पु॒त्रः पि॒त्रोर् अ॑पी॒च्य १॒॑ नाम॑ तृ॒तीय॒म् अधि॑ रोच॒ने दि॒वः ॥ ९ ०७५ ०२
अव॑ द्युता॒नः क॒लशाँ॑ अचिक्रद॒न् नृभि॑र् येमा॒नः कोश॒ आ हि॑र॒ण्यये॑ ।
अ॒भीम् ऋ॒तस्य॑ दो॒हना॑ अनूष॒ताधि॑ त्रिपृ॒ष्ठ उ॒षसो॒ वि रा॑जति ॥ ९ ०७५ ०३
अद्रि॑भिः सु॒तो म॒तिभि॒श् चनो॑हितः प्ररो॒चय॒न् रोद॑सी मा॒तरा॒ शुचिः॑ ।
रोमा॒ण्य् अव्या॑ स॒मया॒ वि धा॑वति॒ मधो॒र् धारा॒ पिन्व॑माना दि॒वे-दि॑वे ॥ ९ ०७५ ०४
परि॑ सोम॒ प्र ध॑न्वा स्व॒स्तये॒ नृभिः॑ पुना॒नो अ॒भि वा॑सया॒शिर॑म् ।
ये ते॒ मदा॑ आह॒नसो॒ विहा॑यस॒स् तेभि॒र् इन्द्रं॑ चोदय॒ दात॑वे म॒घम् ॥ ९ ०७५ ०५

(७८८)

ध॒र्ता दि॒वः प॑वते॒ कृत्व्यो॒ रसो॒ दक्षो॑ दे॒वाना॑म् अनु॒माद्यो॒ नृभिः॑ ।
हरिः॑ सृजा॒नो अत्यो॒ न सत्व॑भि॒र् वृथा॒ पाजां॑सि कृणुते न॒दीष्व् आ ॥ ९ ०७६ ०१
शूरो॒ न ध॑त्त॒ आयु॑धा॒ गभ॑स्त्योः॒ स्व १॒॑ः सिषा॑सन् रथि॒रो गवि॑ष्टिषु ।
इन्द्र॑स्य॒ शुष्म॑म् ई॒रय॑न्न् अप॒स्युभि॒र् इन्दु॑र् हिन्वा॒नो अ॑ज्यते मनी॒षिभिः॑ ॥ ९ ०७६ ०२
इन्द्र॑स्य सोम॒ पव॑मान ऊ॒र्मिणा॑ तवि॒ष्यमा॑णो ज॒ठरे॒ष्व् आ वि॑श ।
प्र णः॑ पिन्व वि॒द्युद् अ॒भ्रेव॒ रोद॑सी धि॒या न वाजाँ॒ उप॑ मासि॒ शश्व॑तः ॥ ९ ०७६ ०३
विश्व॑स्य॒ राजा॑ पवते स्व॒र्दृश॑ ऋ॒तस्य॑ धी॒तिम् ऋ॑षि॒षाळ् अ॑वीवशत् ।

यः सूर्यस्यासिरेण मृज्यते पिता मतीनाम् असमष्टकाव्यः ॥ ९ ०७६ ०४
वृषेव यूथा परि कोशम् अर्षस्य् अपाम् उपस्थे वृषभः कनिक्रदत् ।
स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः ॥ ९ ०७६ ०५

(७८९)

एष प्र कोशे मधुमाꣳ अचिक्रदद् इन्द्रस्य वज्रो वपुषो वपुष्टरः ।
अभीम् ऋतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥ ९ ०७७ ०१
स पूर्व्यः पवते यं दिवस् परि श्येनो मथायद् इषितस् तिरो रजः ।
स मध्व आ युवते वेविजान इत् कृशानोर् अस्तुर् मनसाह बिभ्युषा ॥ ९ ०७७ ०२
ते नः पूवासु उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो ३ न चारवो ब्रह्म-ब्रह्म ये जुजुषुर् हविर्-हविः ॥ ९ ०७७ ०३
अयं नो विद्वान् वनवद् वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भम् आदधे गवाम् उरुब्जम् अभ्य् अर्षति व्रजम् ॥ ९ ०७७ ०४
चक्रिर् दिवः पवते कृत्व्यो रसो महाꣳ अदब्धो वरुणो हुरुग् यते ।
असावि मित्रो वृजनेषु यज्ञियो ऽत्यो न यूथे वृषयुः कनिक्रदत् ॥ ९ ०७७ ०५

(७९०)

प्र राजा वाचं जनयन्न् असिष्यदद् अपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रम् अविर् अस्य तान्वा शुद्धो देवानाम् उप याति निष्कृतम् ॥ ९ ०७८ ०१
इन्द्राय सोम परि षिच्यसे नृभिर् नृचक्षा ऊर्मिः कविर् अज्यसे वने ।
पूर्वीर् हि ते स्रुतयः सन्ति यातवे सहस्रम् अश्वा हरयश् चमूषदः ॥ ९ ०७८ ०२
समुद्रिया अप्सरसो मनीषिणम् आसीना अन्तर् अभि सोमम् अक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नम् पवमानम् अक्षितम् ॥ ९ ०७८ ०३
गोजिन् नः सोमो रथजिद् धिरण्यजित् स्वर्जिद् अब्जित् पवते सहस्रजित् ।
यं देवासश् चक्रिरे पीतये मदं स्वादिष्ठं द्रप्सम् अरुणम् मयोभुवम् ॥ ९ ०७८ ०४
एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन् द्रविणान्य् अर्षसि ।

जहि शत्रुम् अन्तिके दूरके च य उर्वीं गव्यूतिम् अभयं च नस् कृधि ॥ १ ०७८ ०५

(७९१)

अचोदसो नो धन्वन्त्व् इन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन् न इषो अरातयो ऽर्यो नशन्त सनिषन्त नो धियः ॥ १ ०७९ ०१
प्र णो धन्वन्त्व् इन्दवो मदच्युतो धना वा येभिर् अर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित् परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥ १ ०७९ ०२
उत स्वस्या अरात्या अरिर् हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन् न तृष्णा सम् अरीत ताꣳ अभि सोम जहि पवमान दुराध्यः ॥ १ ०७९ ०३
दिवि ते नाभा परमो य आददे पृथिव्यास् ते रुरुहुः सानवि क्षिपः ।
अद्रयस् त्वा बप्सति गोर् अधि त्वच्य् अ १ प्सु त्वा हस्तैर् ददुहुर् मनीषिणः ॥ १ ०७९ ०४
एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।
निदं-निदम् पवमान नि तारिष आविस् ते शुष्मो भवतु प्रियो मदः ॥ १ ०७९ ०५

(७९२)

सोमस्य धारा पवते नृचक्षस ऋतेन देवान् हवते दिवस् परि ।
बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥ १ ०८० ०१
यं त्वा वाजिन्न् अघ्न्या अभ्य् अनूषतायोहतं योनिम् आ रोहसि द्युमान् ।
मघोनाम् आयुः प्रतिरन् महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥ १ ०८० ०२
एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन् हरिर् अत्यः स्यन्दते वृषा ॥ १ ०८० ०३
तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाꣳ आ पवस्वा सहस्रजित् ॥ १ ०८० ०४
तं त्वा हस्तिनो मधुमन्तम् अद्रिभिर् दुहन्त्य् अप्सु वृषभं दश क्षिपः ।
इन्द्रं सोम मादयन् दैव्यं जनं सिन्धोर् इवोर्मिः पवमानो अर्षसि ॥ १ ०८० ०५

(७९३)

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दध्ना यद् ईम् उन्नीता यशसा गवां दानाय शूरम् उदमन्दिषुः सुताः ॥ ९ ०८१ ०१
अच्छा हि सोमः कलशाँ असिष्यदद् अत्यो न वोळ्हा रघुवर्तनिर् वृषा ।
अथा देवानाम् उभयस्य जन्मनो विद्वाँ अश्नोत्य् अमुत इतश् च यत् ॥ ९ ०८१ ०२
आ नः सोम पवमानः किरा वस्व् इन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसव सु चेतुना मा नो गयम् आरे अस्मत् परा सिचः ॥ ९ ०८१ ०३
आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर् मरुतो वायुर् अश्विना त्वष्टा सविता सुयमा सरस्वती ॥ ९ ०८१ ०४
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर् विधाता ।
भगो नृशंस उर्व् अ ऽन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥ ९ ०८१ ०५

(७९४)

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारम् पर्य् एत्य् अव्ययं श्येनो न योनिं घृतवन्तम् आसदम् ॥ ९ ०८२ ०१
कविर् वेधस्या पर्य् एषि माहिनम् अत्यो न मृष्टो अभि वाजम् अर्षसि ।
अपसेधन् दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥ ९ ०८२ ०२
पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उतासरन् सं ग्रावभिर् नसते वीते अध्वरे ॥ ९ ०८२ ०३
जायेव पत्याव् अधि शेव मंहसे पज्रायां गर्भं शृणुहि ब्रवीमि ते ।
अन्तर् वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥ ९ ०८२ ०४
यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजम् इन्दो ।
एवा पवस्व सुविताय नव्यसे तव व्रतम् अन्व् आपः सचन्ते ॥ ९ ०८२ ०५

(७१५)

पवित्रं ते विततम् ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि विश्वतः ।
अतप्ततनूर् न तद् आमो अश्नुते शृतास इद् वहन्तस् तत् सम् आशत ॥ १ ०८३ ०१
तपोष् पवित्रं विततं दिवस् पदे शोचन्तो अस्य तन्तवो व्य् अस्थिरन् ।
अवन्त्य् अस्य पवीतारम् आशवो दिवस् पृष्ठम् अधि तिष्ठन्ति चेतसा ॥ १ ०८३ ०२
अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भम् आ दधुः ॥ १ ०८३ ०३
गन्धर्व इत्था पदम् अस्य रक्षति पाति देवानां जनिमान्य् अद्भुतः ।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षम् आशत ॥ १ ०८३ ०४
हविर् हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्य् अध्वरम् ।
राजा पवित्ररथो वाजम् आरुहः सहस्रभृष्टिर् जयसि श्रवो बृहत् ॥ १ ०८३ ०५

(७१६)

पवस्व देवमादनो विचर्षणिर् अप्सा इन्द्राय वरुणाय वायवे ।
कृधी नो अद्य वरिवः स्वस्तिमद् उरुक्षितौ गृणीहि दैव्यं जनम् ॥ १ ०८४ ०१
आ यस् तस्थौ भुवनान्य् अमर्त्यो विश्वानि सोमः परि तान्य् अर्षति ।
कृण्वन् संचृतं विचृतम् अभिष्टय इन्दुः सिषक्त्य् उषसं न सूर्यः ॥ १ ०८४ ०२
आ यो गोभिः सृज्यत ओषधीष्व् आ देवानां सुम्न इषयन्न् उपावसुः ।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन् दैव्यं जनम् ॥ १ ०८४ ०३
एष स्य सोमः पवते सहस्रजिद् धिन्वानो वाचम् इषिराम् उषर्बुधम् ।
इन्दुः समुद्रम् उद् इयर्ति वायुभिर् एन्द्रस्य हार्दि कलशेषु सीदति ॥ १ ०८४ ०४
अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥ १ ०८४ ०५

(७१७)

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।

मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्व् इन्दवः ॥ १ ०८५ ०१
अस्मान् समर्ये पवमान चोदय दक्षो देवानाम् असि हि प्रियो मदः ।
जहि शत्रूर् अभ्य् आ भन्दनायतः पिबेन्द्र सोमम् अव नो मृधो जहि ॥ १ ०८५ ०२
अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिर् उत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानम् अस्य भुवनस्य निंसते ॥ १ ०८५ ०३
सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यम् मधु ।
जयन् क्षेत्रम् अभ्य् अर्षा जयन्न् अप उरुं नो गातुं कृणु सोम मीढ्वः ॥ १ ०८५ ०४
कनिक्रदत् कलशे गोभिर् अज्यसे व्य् अ १ व्ययं समया वारम् अर्षसि ।
मर्मृज्यमानो अत्यो न सानसिर् इन्द्रस्य सोम जठरे सम् अक्षरः ॥ १ ०८५ ०५
स्वादुः पवस्व दिव्याय जन्मने स्वादुर् इन्द्राय सुहवीतुनाम्ने ।
स्वादुर् मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥ १ ०८५ ०६
अत्यम् मृजन्ति कलशे दश क्षिपः प्र विप्राणाम् मतयो वाच ईरते ।
पवमाना अभ्य् अर्षन्ति सुष्टुतिम् एन्द्रं विशन्ति मदिरास इन्दवः ॥ १ ०८५ ०७
पवमानो अभ्य् अर्षा सुवीर्यम् उर्वीं गव्यूतिम् महि शर्म सप्रथः ।
माकिर् नो अस्य परिषूतिर् ईशतेन्दो जयेम त्वया धनं-धनम् ॥ १ ०८५ ०८
अधि द्याम् अस्थाद् वृषभो विचक्षणो ऽरूरुचद् वि दिवो रोचना कविः ।
राजा पवित्रम् अत्य् एति रोरुवद् दिवः पीयूषं दुहते नृचक्षसः ॥ १ ०८५ ०९
दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्य् उक्षणं गिरिष्ठाम् ।
अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोर् ऊर्मा मधुमन्तम् पवित्र आ ॥ १ ०८५ १०
नाके सुपर्णम् उपपप्तिवांसं गिरो वेनानाम् अकृपन्त पूर्वीः ।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥ १ ०८५ ११
ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद् विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्य् अद्यौत् प्रारूरुचद् रोदसी मातरा शुचिः ॥ १ ०८५ १२

(७१८)

प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना ।
दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशम् आसते ॥ १ ०८६ ०१

प्र ते मदासो मदिरास आशवो ऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर् न वत्सम् पयसाभि वज्रिणम् इन्द्रम् इन्दवो मधुमन्त ऊर्मयः ॥ १ ०८६ ०२
अत्यो न हियानो अभि वाजम् अर्ष स्वर्वित् कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥ १ ०८६ ०३
प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन् पयसा धरीमणि ।
प्रान्तर् ऋषय स्थाविरीर् असृक्षत ये त्वा मृजन्त्य् ऋषिषाण वेधसः ॥ १ ०८६ ०४
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस् ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर् विश्वस्य भुवनस्य राजसि ॥ १ ०८६ ०५
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥ १ ०८६ ०६
यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानाम् उप याति निष्कृतम् ।
सहस्रधारः परि कोशम् अर्षति वृषा पवित्रम् अत्य् एति रोरुवत् ॥ १ ०८६ ०७
राजा समुद्रं नद्यो ३ वि गाहते ऽपाम् ऊर्मिं सचते सिन्धुषु श्रितः ।
अध्य् अस्थात् सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥ १ ०८६ ०८
दिवो न सानु स्तनयन्न् अचिक्रदद् द्यौश् च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यम् पवते विवेविदत् सोमः पुनानः कलशेषु सीदति ॥ १ ०८६ ०९
ज्योतिर् यज्ञस्य पवते मधु प्रियम् पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोर् अपीच्यम् मदिन्तमो मत्सर इन्द्रियो रसः ॥ १ ०८६ १०
अभिक्रन्दन् कलशं वाज्य् अर्षति पतिर् दिवः शतधारो विचक्षणः ।
हरिर् मित्रस्य सदनेषु सीदति मर्मृजानो ऽविभिः सिन्धुभिर् वृषा ॥ १ ०८६ ११
अग्रे सिन्धूनाम् पवमानो अर्षत्य् अग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥ १ ०८६ १२
अयम् मतवाञ् छकुनो यथा हितो ऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर् धिया पवते सोम इन्द्र ते ॥ १ ०८६ १३
द्रापिं वसानो यजतो दिविस्पृशम् अन्तरिक्षप्रा भुवनेष्व् अर्पितः ।
स्वर् जज्ञानो नभसाभ्य् अक्रमीत् प्रत्नम् अस्य पितरम् आ विवासति ॥ १ ०८६ १४
सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।
पदं यद् अस्य परमे व्योमन्य् अतो विश्वा अभि सं याति संयतः ॥ १ ०८६ १५

प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयाम्ना पथा ॥ १ ०८६ १६
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्व् अक्रमुः ।
सोमम् मनीषा अभ्य् अनूषत स्तुभो ऽभि धेनवः पयसेम् अशिश्रयुः ॥ १ ०८६ १७
आ नः सोम संयतम् पिप्युषीम् इषम् इन्दो पवस्व पवमानो अस्रिधम् ।
या नो दोहते त्रिर् अह्नन् असश्चुषी क्षुमद् वाजवन् मधुमद् सुवीर्यम् ॥ १ ०८६ १८
वृषा मतीनाम् पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवशद् इन्द्रस्य हार्द्य आविशन् मनीषिभिः ॥ १ ०८६ १९
मनीषिभिः पवते पूर्व्यः कविर् नृभिर् यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन् मधु क्षरद् इन्द्रस्य वायोः सख्याय कर्तवे ॥ १ ०८६ २०
अयम् पुनान उषसो वि रोचयद् अयं सिन्धुभ्यो अभवद् उलोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ १ ०८६ २१
पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।
सीदन्न् इन्द्रस्य जठरे कनिक्रदन् नृभिर् यतः सूर्यम् आरोहयो दिवि ॥ १ ०८६ २२
अद्रिभिः सुतः पवसे पवित्र आँ इन्दव् इन्द्रस्य जठरेष्व् आविशन् ।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रम् अङ्गिरोभ्यो ऽवृणोर् अप ॥ १ ०८६ २३
त्वां सोम पवमानं स्वाध्यो ऽनु विप्रासो अमदन्न् अवस्यवः ।
त्वां सुपर्ण आभरद् दिवस् परीन्दो विश्वाभिर् मतिभिः परिष्कृतम् ॥ १ ०८६ २४
अव्ये पुनानम् परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।
अपाम् उपस्थे अध्य् आयवः कविम् ऋतस्य योना महिषा अहेषत ॥ १ ०८६ २५
इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन् सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिज हर्यतः कविर् अत्यो न क्रीळन् परि वारम् अर्षति ॥ १ ०८६ २६
असश्चतः शतधारा अभिश्रियो हरिं नवन्ते ऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिर् आवृतं तृतीये पृष्ठे अधि रोचने दिवः ॥ १ ०८६ २७
तवेमाः प्रजा दिव्यस्य रेतसस् त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वम् पवमान ते वशे त्वम् इन्दो प्रथमो धामधा असि ॥ १ ०८६ २८
त्वं समुद्रो असि विश्ववित् कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।

त्वं द्यां च॑ पृथि॒वीं चाति॑ जभ्रिषे॒ तव॒ ज्योती॑ंषि पवमा॒न सू॒र्य॑: ॥ ९ ०८६ २९
त्वम् प॒वित्रे॒ रज॑सो॒ विध॑र्मणि॒ देवे॑भ्य॒: सोम पवमान पूयसे ।
त्वाम् उ॒शिज॑: प्रथ॒मा अ॑गृभ्णत॒ तुभ्ये॒मा विश्वा॒ भुव॑नानि येमिरे ॥ ९ ०८६ ३०
प्र रे॑भ॒ एत्य् अति॒ वार॑म् अ॒व्ययं॑ वृषा॒ वने॑ष्व् अव॑ चक्रद॒द् धरि॑: ।
सं धी॒तयो॑ वावशा॒ना अ॑नूषत शिशुं॒ रिह॑न्ति म॒तय॒: पनि॑प्नतम् ॥ ९ ०८६ ३१
स सूर्य॑स्य र॒श्मिभि॒: परि॑ व्यत तन्तुं॒ तन्वा॑नस् त्रि॒वृत॑ं यथा॑ वि॒दे ।
नय॑न्न् ऋ॒तस्य॑ प्र॒शिषो॒ नवी॑यसी॒: पति॒र् जनी॑नाम् उप॑ याति निष्कृ॒तम् ॥ ९ ०८६ ३२
राजा॒ सिन्धू॑नाम् पवते॒ पति॒र् दिव॑ ऋ॒तस्य॑ याति॒ प॒थिभि॒: कनि॑क्रदत् ।
सह॒स्र॑धार॒: परि॑ षिच्यते॒ हरि॑: पुना॒नो वाच॑ ज॒नय॒न्न् उपा॑वसुः ॥ ९ ०८६ ३३
पव॑मा॒न मह्य् अर्णो॑ वि धा॑वसि॒ सूरो॒ न चि॒त्रो अ॒व्ययानि॒ पव्यया ।
गभ॑स्तिपूतो॒ नृभि॒र् अद्रि॑भिः सु॒तो म॒हे वाजा॑य॒ धन्या॑य धन्वसि ॥ ९ ०८६ ३४
इष॒म् ऊर्ज॑म् पवमाना॒भ्य् अर्षसि श्ये॒नो न वंसु॑ क॒लशे॑षु सीदसि ।
इन्द्रा॑य॒ मद्वा॒ मद्यो॒ मद॑: सु॒तो दि॒वो वि॒ष्टम्भ॒ उप॑मो वि॒चक्ष॑णः ॥ ९ ०८६ ३५
स॒प्त स्वसा॑रो॒ अ॒भि मा॒तर॒: शिशुं॒ नव॑ं जज्ञा॒नं जेन्यं॑ विप॒श्चित॑म् ।
अ॒पां ग॒न्धर्वं॑ दि॒व्यं नृ॒चक्ष॑सं॒ सोमं॑ विश्व॒स्य॒ भुव॑नस्य॒ राज॑से॑ ॥ ९ ०८६ ३६
ईशा॑न इ॒मा भुव॑नानि वीयसे॒ युजा॑न इ॒न्दो ह॒रित॑: सुपर्ण्यः ।
तास् ते॑ क्षरन्तु मधु॒मद् घृ॒तम् पय॒स् तव॑ व्र॒ते सोम॑ तिष्ठन्तु कृ॒ष्टय॑: ॥ ९ ०८६ ३७
त्वं नृ॒चक्षा॑ असि सोम विश्व॒त॒: पव॑मान वृषभ॒ ता वि धा॑वसि ।
स न॑: पवस्व वसु॒मद् धि॑रण्यव॒द् वयं स्याम॒ भुव॑नेषु जी॒वसे॑ ॥ ९ ०८६ ३८
गो॒वित् प॑वस्व वसु॒विद् धि॑रण्यवि॒द् रे॑तो॒धा इ॑न्दो॒ भुव॑नेष्व् अर्पि॑तः ।
त्वं सु॒वीरो॑ असि सोम विश्ववित् तं त्वा विप्रा उप॑ गि॒रेम आ॑सते ॥ ९ ०८६ ३९
उन् मध्व॑ ऊ॒र्मिर् व॒नना॑ अतिष्ठिपद् अपो वसा॑नो महि॒षो वि गा॑हते ।
राजा॑ प॒वित्र॑रथो वाज॒म् आरु॑हत् स॒हस्र॑भृष्टिर् जयति श्रवो॑ बृ॒हत् ॥ ९ ०८६ ४०
स भ॒न्दना उद् इ॑यर्ति प्र॒जाव॑तीर् वि॒श्वायु॒र् विश्वा॑: सु॒भरा॒ अह॑र्दिवि ।
ब्रह्म॑ प्र॒जाव॑द् र॒यिम् अ॒श्वपस्त्यम् पी॑त इ॒न्दव् इन्द्र॑म् अ॒स्मभ्य॑ याचतात् ॥ ९ ०८६ ४१
सो अग्रे॒ अह्नां॑ हरि॒र् हर्य॑तो मद॒: प्र चे॑तसा चेतयते॒ अनु॒ द्युभि॑: ।
द्वा जना॑ यातयन्न् अ॒न्तर् ई॑यते नरा॑ च शंसं दै॒व्यं॑ च॒ धर्त॑रि ॥ ९ ०८६ ४२
अ॒ञ्ज॒ते व्य् अ॑ञ्जते॒ सम् अ॑ञ्जते॒ क्रतुं॑ रिहन्ति॒ मधु॑नाभ्य् अञ्जते ।

सिन्धोर् उच्छ्वासे पतयन्तम् उक्षणं हिरण्यपावाः पशुम् आसु गृभ्णते ॥ ९ ०८६ ४३
विपश्चिते पवमानाय गायत मही न धारात्य् अन्धो अर्षति ।
अहिर् न जूर्णाम् अति सर्पति त्वचम् अत्यो न क्रीळन्न् असरद् वृषा हरिः ॥ ९ ०८६ ४४
अग्रेगो राजाप्यस् तविष्यते विमानो अह्नाम् भुवनेष्व् अर्पितः ।
हरिर् घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ ९ ०८६ ४५
असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर् भुवनान्य् अर्षति ।
अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजम् ऋग्मिणो ययुः ॥ ९ ०८६ ४६
प्र ते धारा अत्य् अण्वानि मेष्यः पुनानस्य संयतो यन्ति रंह्यः ।
यद् गोभिर् इन्दो चम्वोः समज्यस आ सुवानः सोम क्लशेषु सीदसि ॥ ९ ०८६ ४७
पवस्व सोम क्रतुविन् न उक्थ्यो ऽव्यो वारे परि धाव मधु प्रियम् ।
जहि विश्वान् रक्षस इन्दो अत्रिणो बृहद् वदेम विदथे सुवीराः ॥ ९ ०८६ ४८

(७९९)

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजम् अर्ष ।
अश्वं न त्वा वाजिनम् मर्जयन्तो ऽच्छा बर्ही रशनाभिर् नयन्ति ॥ ९ ०८७ ०१
स्वायुधः पवते देव इन्दुर् अशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥ ९ ०८७ ०२
ऋषिर् विप्रः पुरएता जनानाम् ऋभुर् धीरः उशना काव्येन ।
स चिद् विवेद निहितं यद् आसाम् अपीच्यं गुह्यं नाम गोनाम् ॥ ९ ०८७ ०३
एष स्य ते मधुमाꣳ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमम् बर्हिर् आ वाज्य् अस्थात् ॥ ९ ०८७ ०४
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ् छ्रवस्यवो न पृतनाजो अत्याः ॥ ९ ०८७ ०५
परि हि ष्मा पुरुहूतो जनानां विश्वासरद् भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजम् अर्ष ॥ ९ ०८७ ०६
एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावद् अर्वा ।

तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्न् अभि शूरो न सत्वा ॥ १ ०८७ ०७
एषा ययौ परमाद् अन्तर् अद्रेः कूचित् सतीर् ऊर्वे गा विवेद ।
दिवो न विद्युत् स्तनयन्त्य् अभ्रेः सोमस्य ते पवत इन्द्र धारा ॥ १ ०८७ ०८
उत स्म राशिम् परि यासि गोनाम् इन्द्रेण सोम सरथम् पुनानः ।
पूर्वीर् इषो बृहतीर् जीरदानो शिक्षा शचीवस् तव ता उपष्टुत् ॥ १ ०८७ ०९

(८००)

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यम् पवते त्वम् अस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुम् मदाय युज्याय सोमम् ॥ १ ०८८ ०१
स ईं रथो न भुरिषाळ् अयोजि महः पुरूणि सातये वसूनि ।
आद् ईं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ १ ०८८ ०२
वायुर् न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शम्भविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन् पूषेव धीजवनो ऽसि सोम ॥ १ ०८८ ०३
इन्द्रो न यो महा कर्माणि चक्रिर् हन्ता वृत्राणाम् असि सोम पूर्भित् ।
पैद्वो न हि त्वम् अहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥ १ ०८८ ०४
अग्निर् न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिर् इयर्ति सोमः पवमान ऊर्मिम् ॥ १ ०८८ ०५
एते सोमा अति वाराण्य् अव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥ १ ०८८ ०६
शुष्मी शर्धो न मारुतम् पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर् भवा नः सहस्रापाः पृतनाषाण् न यज्ञः ॥ १ ०८८ ०७
राज्ञो नु ते वरुणस्य व्रतानि बृहद् गभीरं तव सोम धाम ।
शुचिष् ट्वम् असि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ १ ०८८ ०८

(८०१)

प्रो स्य वह्निः पथ्याभिर् अस्यान् दिवो न वृष्टिः पवमानो अक्षाः ।

सहस्रधारो असदन् न्य् अ १ स्मे मातुर् उपस्थे वन आ च सोमः ॥ १ ०८१ ०१
राजा सिन्धूनाम् अवसिष्ट वास ऋतस्य नावम् आरुहद् रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईम् पिता दुह ईम् पितुर् जाम् ॥ १ ०८१ ०२
सिंहं नसन्त मध्वो अयासं हरिम् अरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्य् उक्षा ॥ १ ०८१ ०३
मधुपृष्ठं घोरम् अयासम् अश्वं रथे युञ्जन्त्य् उरुचक्र ऋष्वम् ।
स्वसार ई जामयो मर्जयन्ति सनाभयो वाजिनम् ऊर्जयन्ति ॥ १ ०८१ ०४
चतस्र ई घृतदुहः सचन्ते समाने अन्तर् धरुणे निषत्ताः ।
ता ईम् अर्षन्ति नमसा पुनानास् ता ईं विश्वतः परि षन्ति पूर्वीः ॥ १ ०८१ ०५
विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत् त उत्सो गृणते नियुत्वान् मध्वो अंशुः पवत इन्द्रियाय ॥ १ ०८१ ०६
वन्वन्न् अवातो अभि देववीतिम् इन्द्राय सोम वृत्रहा पवस्व ।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥ १ ०८१ ०७

(८०२)

प्र हिन्वानो जनिता रोदस्यो रथो न वाज सनिष्यन्न् अयासीत् ।
इन्द्रं गच्छन्न् आयुधा संशिशानो विश्वा वसु हस्तयोर् आदधानः ॥ १ ०९० ०१
अभि त्रिपृष्ठं वृषणं वयोधाम् आङ्गूषाणाम् अवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धून् वि रत्नधा दयते वार्याणि ॥ १ ०९० ०२
शूरग्रामः सर्ववीरः सहावान् जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्व् असाळ्हः साह्वान् पृतनासु शत्रून् ॥ १ ०९० ०३
उरुगव्यूतिर् अभयानि कृण्वन् समीचीने आ पवस्वा पुरंधी ।
अपः सिषासन्न् उषसः स्व १ र् गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ १ ०९० ०४
मत्सि सोम वरुणम् मत्सि मित्रम् मत्सीन्द्रम् इन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतम् मत्सि देवान् मत्सि महाम् इन्द्रम् इन्दो मदाय ॥ १ ०९० ०५
एवा राजेव ऋतुभाः अमेन विश्वा घनिघ्नद् दुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा युयम् पात स्वस्तिभिः सदा नः ॥ १ ०९० ०६

(८०३)

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्ये ऽजन्ति वह्निं सदनान्य् अच्छ ॥ ९ ०९१ ०१
वीती जनस्य दिव्यस्य कव्यैर् अधि सुवानो नहुष्येभिर् इन्दुः ।
प्र यो नृभिर् अमृतो मर्त्येभिर् मर्मृजानो ऽविभिर् गोभिर् अद्भिः ॥ ९ ०९१ ०२
वृषा वृष्णे रोरुवद् अंशुर् अस्मै पवमानो रुशद् ईर्ते पयो गोः ।
सहस्रम् ऋक्वा पथिभिर् वचोविद् अध्वस्मभिः सूरो अण्वं वि याति ॥ ९ ०९१ ०३
रुजा दृळ्हा चिद् रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।
वृश्चोपरिष्टात् तुजता वधेन ये अन्ति दूराद् उपनायम् एषाम् ॥ ९ ०९१ ०४
स प्रत्नवन् नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।
ये दुःषहासो वनुषा बृहन्तस् तांस् ते अश्याम पुरुकृत् पुरुक्षो ॥ ९ ०९१ ०५
एवा पुनानो अपः स्व १ र् गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रम् उरु ज्योतींषि सोम ज्योङ् नः सूर्यं दृशये रिरीहि ॥ ९ ०९१ ०६

(८०४)

परि सुवानो हरिर् अंशुः पवित्रे रथो न सर्जि सनये हियानः ।
आपच् छ्लोकम् इन्द्रियम् पूयमानः प्रति देवाꣳ अजुषत प्रयोभिः ॥ ९ ०९२ ०१
अच्छा नृचक्षा असरत् पवित्रे नाम दधानः कविर् अस्य योनौ ।
सीदन् होतेव सदने चमूषूपेम् अग्मन्न् ऋषयः सप्त विप्राः ॥ ९ ०९२ ०२
प्र सुमेधा गातुविद् विश्वदेवः सोमः पुनानः सद एति नित्यम् ।
भुवद् विश्वेषु काव्येषु रन्तानु जनान् यतते पञ्च धीरः ॥ ९ ०९२ ०३
तव त्ये सोम पवमान निण्ये विश्वे देवास् त्रय एकादशासः ।
दश स्वधाभिर् अधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥ ९ ०९२ ०४
तन् नु सत्यम् पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त ।
ज्योतिर् यद् अह्ने अकृणोद् उलोकम् प्रावन् मनुं दस्यवे कर् अभीकम् ॥ ९ ०९२ ०५

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीर् इयानः ।
सोमः पुनानः कलशाँ अयासीत् सीदन् मृगो न महिषो वनेषु ॥ ९ ०९२ ०६

(८०५)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्य् अद्रवज् जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ९ ०९३ ०१
सम् मातृभिर् न शिशुर् वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषाम् अभि निष्कृतं यन् सं गच्छते कलश उस्रियाभिः ॥ ९ ०९३ ०२
उत प्र पिप्य ऊधर् अघ्न्याया इन्दुर् धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्व् अभि श्रीणन्ति वसुभिर् न निक्तैः ॥ ९ ०९३ ०३
स नो देवेभिः पवमान रदेन्दो रयिम् अस्मिनं वावशानः ।
रथिरायताम् उशती पुरंधिर् अस्मद्र्यग् आ दावने वसूनाम् ॥ ९ ०९३ ०४
नू नो रयिम् उप मास्व नृवन्तम् पुनानो वाताप्यं विश्वश्चन्द्रम् ।
प्र वन्दितुर् इन्दो तार्य् आयुः प्रातर् मक्षू धियावसुर् जगम्यात् ॥ ९ ०९३ ०५

(८०६)

अधि यद् अस्मिन् वाजिनीव शुभ स्पर्धन्ते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन् व्रजं न पशुवर्धनाय मन्म ॥ ९ ०९४ ०१
द्विता व्यूर्ण्वन् अमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।
धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीर् अभि वावश्र इन्दुम् ॥ ९ ०९४ ०२
परि यत् कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन् दक्षाय रायः पुरुभूषु नव्यः ॥ ९ ०९४ ०३
श्रिये जातः श्रिय आ निर् इयाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वम् आयन् भवन्ति सत्या समिथा मितद्रौ ॥ ९ ०९४ ०४
इषम् ऊर्जम् अभ्य् अर्षाश्वं गाम् उरु ज्योतिः कृणुहि मत्सि देवान् ।
विश्वानि हि सुषहा तानि तुभ्यम् पवमान बाधसे सोम शत्रून् ॥ ९ ०९४ ०५

(८०७)

कनिक्रन्ति हरिर् आ सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
नृभिर् यतः कृणुते निर्णिजं गा अतो मतीर् जनयत स्वधाभिः ॥ १ ०९५ ०१
हरिः सृजानः पथ्याम् ऋतस्येयर्ति वाचम् अरितेव नावम् ।
देवो देवानां गुह्यानि नामाविष् कृणोति बर्हिषि प्रवाचे ॥ १ ०९५ ०२
अपाम् इवेद् ऊर्मयस् तर्तुराणाः प्र मनीषा ईरते सोमम् अच्छ ।
नमस्यन्तीर् उप च यन्ति सं चा च विशन्त्य् उशतीर् उशन्तम् ॥ १ ०९५ ०३
तम् मर्मृजानम् महिषं न सानाव् अंशुं दुहन्त्य् उक्षणं गिरिष्ठाम् ।
तं वावशानम् मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥ १ ०९५ ०४
इष्यन् वाचम् उपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश् च यत् क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥ १ ०९५ ०५

(८०८)

प्र सेनानीः शूरो अग्रे रथानां गव्यन्न् एति हर्षते अस्य सेना ।
भद्रान् कृण्वन्न् इन्द्रहुवान् सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ १ ०९६ ०१
सम् अस्य हरिं हरयो मृजन्त्य् अश्वहयैर् अनिशितं नमोभिः ।
आ तिष्ठति रथम् इन्द्रस्य सखा विद्वाँ एना सुमतिं यात्य् अच्छ ॥ १ ०९६ ०२
स नो देव देवताति पवस्व महे सोम प्सरस इन्द्रपानः ।
कृण्वन्न् अपो वर्षयन् द्याम् उतेमाम् उरोर् आ नो वरिवस्या पुनानः ॥ १ ०९६ ०३
अजीतये ऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।
तद् उशन्ति विश्व इमे सखायस् तद् अहं वशिम पवमान सोम ॥ १ ०९६ ०४
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर् जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ १ ०९६ ०५
ब्रह्मा देवानाम् पदवीः कवीनाम् ऋषिर् विप्राणाम् महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर् वनानां सोमः पवित्रम् अत्य् एति रेभन् ॥ १ ०९६ ०६

प्रावीविपद् वाच ऊर्मिं न सिन्धुर् गिरः सोमः पवमानो मनीषाः ।
अन्तः पश्यन् वृजनेमावराण्य् आ तिष्ठति वृषभो गोषु जानन् ॥ ९ ०९६ ०७
स मत्सरः पृत्सु वन्वन्न् अवातः सहस्ररेता अभि वाजम् अर्ष ।
इन्द्रायेन्दो पवमानो मनीष्य् अ ँशोर् ऊर्मिम् ईरय गा इषण्यन् ॥ ९ ०९६ ०८
परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इन्दुर् वाजी न सप्तिः समना जिगाति ॥ ९ ०९६ ०९
स पूर्व्यो वसुविज् जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विदद् गातुम् ब्रह्मणे पूयमानः ॥ ९ ०९६ १०
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्न् अवातः परिधीर् अपोर्णु वीरेभिर् अश्वैर् मघवा भवा नः ॥ ९ ०९६ ११
यथापवथा मनवे वयोधा अमित्रहा वरिवोविद् धविष्मान् ।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥ ९ ०९६ १२
पवस्व सोम मधुमाꣳ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥ ९ ०९६ १३
वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर् देववीतौ ।
सं सिन्धुभिः कलशे वावशानः सम् उस्रियाभिः प्रतिरन् न आयुः ॥ ९ ०९६ १४
एष स्य सोमो मतिभिः पुनानो ऽत्यो न वाजी तरतीद् अरातीः ।
पयो न दुग्धम् अदितेर् इषिरम् उर्व् ऐव गातुः सुयमो न वोळ्हा ॥ ९ ०९६ १५
स्वायुधः सोतृभिः पूयमानो ऽभ्य् अर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिर् इव श्रवस्याभि वायुम् अभि गा देव सोम ॥ ९ ०९६ १६
शिशुं जज्ञानं हर्यतम् मृजन्ति शुम्भन्ति वह्निम् मरुतो गणेन ।
कविर् गीर्भिः काव्येना कविः सन् सोमः पवित्रम् अत्य् एति रेभन् ॥ ९ ०९६ १७
ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन् सोमो विराजम् अनु राजति ष्टुप् ॥ ९ ०९६ १८
चमूषच् छ्येनः शकुनो विभृत्वा गोविन्दुर् द्रप्स आयुधानि बिभ्रत् ।
अपाम् ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ९ ०९६ १९
मर्यो न शुभ्रस् तन्वम् मृजानो ऽत्यो न सृत्वा सनये धनानाम् ।
वृषेव यूथा परि कोशम् अर्षन् कनिक्रदच् चम्वो ३ र् आ विवेश ॥ ९ ०९६ २०

पवस्वेन्दो पवमानो महोभिः कनिक्रदत् परि वाराण्य् अर्ष ।
क्रीळꣳ चम्वो ३ र् आ विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ॥ १ ०९६ २१
प्रास्य धारा बृहतीर् असृग्रन्न् अक्तो गोभिः कलशाꣳ आ विवेश ।
साम कृण्वन् सामन्यो विपश्चित् क्रन्दन्न् एत्य् अभि सख्युर् न जामिम् ॥ १ ०९६ २२
अपघ्नन् एषि पवमान शत्रून् प्रियां न जारो अभिगीत इन्दुः ।
सीदन् वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥ १ ०९६ २३
आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिर् आनीतः पुरुवारो अप्स्व् अचिक्रदत् कलशे देवयूनाम् ॥ १ ०९६ २४

(८०९)

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः सम् अपृक्त रसम् ।
सुतः पवित्रम् पर्य् एति रेभन् मितेव सद्म पशुमान्ति होता ॥ १ ०९७ ०१
भद्रा वस्त्रा समन्या ३ वसानो महान् कविर् निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर् देववीतौ ॥ १ ०९७ ०२
सम् उ प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयम् पात स्वस्तिभिः सदा नः ॥ १ ०९७ ०३
प्र गायताभ्य् अर्चाम देवान् सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारम् अव्यम् आ सीदाति कलशं देवयुर् नः ॥ १ ०९७ ०४
इन्दुर् देवानाम् उप सख्यम् आयन् सहस्रधारः पवते मदाय ।
नृभि स्तवानो अनु धाम पूर्वम् अगन्न् इन्द्रम् महते सौभगाय ॥ १ ०९७ ०५
स्तोत्रे राये हरिर् अर्षा पुनान इन्द्रम् मदो गच्छतु ते भराय ।
देवैर् याहि सरथं राधो अच्छा यूयम् पात स्वस्तिभिः सदा नः ॥ १ ०९७ ०६
प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ १ ०९७ ०७
प्र हंसासस् तृपलम् मन्युम् अच्छामाद् अस्तं वृषगणा अयासुः ।
आङ्गुष्य १ म् पवमानं सखायो दुर्मर्षं साकम् प्र वदन्ति वाणम् ॥ १ ०९७ ०८
स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तम् मिमते न गावः ।

परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर् ददृशे नक्तम् ऋज्रः ॥ ९ ०९७ ०९
इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
हन्ति रक्षो बाधते पर्य् अरातीर् वरिवः कृण्वन् वृजनस्य राजा ॥ ९ ०९७ १०
अध धारया मध्वा पृचानस् तिरो रोम पवते अद्रिदुग्धः ।
इन्दुर् इन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ ९ ०९७ ११
अभि प्रियाणि पवते पुनानो देवो देवान् स्वेन रसेन पृञ्चन् ।
इन्दुर् धर्माण्य् ऋतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥ ९ ०९७ १२
वृषा शोणो अभिकनिक्रदद् गा नदयन्न् एति पृथिवीम् उत द्याम् ।
इन्द्रस्येव वग्नुर् आ शृण्व आजौ प्रचेतयन्न् अर्षति वाचम् एमाम् ॥ ९ ०९७ १३
रसाय्यः पयसा पिन्वमान ईरयन्न् एषि मधुमन्तम् अंशुम् ।
पवमानः संतनिम् एषि कृण्वन्न् इन्द्राय सोम परिषिच्यमानः ॥ ९ ०९७ १४
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः ।
परि वर्णम् भरमाणो रुशन्तं गव्युर् नो अर्ष परि सोम सिक्तः ॥ ९ ०९७ १५
जुष्टवी नो इन्दो सुपथा सुगान्य् उरौ पवस्व वरिवांसि कृण्वन् ।
घनेव विष्वग् दुरितानि विघ्नन् अधि ष्णुना धन्व सानो अव्ये ॥ ९ ०९७ १६
वृष्टिं नो अर्ष दिव्यां जिगत्नुम् इळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन् बन्धूर् इमाꣳ अवराꣳ इन्दो वायून् ॥ ९ ०९७ १७
ग्रन्थिं न वि ष्य ग्रथितम् पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिर् आ सृजानो मर्यो देव धन्व पस्त्यावान् ॥ ९ ०९७ १८
जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।
सहस्रधारः सुरभिर् अदब्धः परि स्रव वाजसातौ नृषह्ये ॥ ९ ०९७ १९
अरश्मानो ये ऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस् ताꣳ उप याता पिबध्यै ॥ ९ ०९७ २०
एवा नो इन्दो अभि देववीतिम् परि स्रव नभो अर्णश् चमूषु ।
सोमो अस्मभ्यं काम्यम् बृहन्तं रयिं ददातु वीरवन्तम् उग्रम् ॥ ९ ०९७ २१
तक्षद् यदी मनसो वेनतो वाग् ज्येष्ठस्य वा धर्मणि क्षोर् अनीके ।
आद् ईम् आयन् वरम् आ वावशाना जुष्टम् पतिं कलशे गाव इन्दुम् ॥ ९ ०९७ २२
प्र दानुदो दिव्यो दानुपिन्व ऋतम् ऋताय पवते सुमेधाः ।

धर्मा भुवद् वृजन्यस्य राजा प्र रश्मिभिर् दशभिर् भारि भूम ॥ ९ ०९७ २३
पवित्रेभिः पवमानो नृचक्षा राजा देवानाम् उत मर्त्यानाम् ।
द्विता भुवद् रयिपती रयीणाम् ऋतम् भरत् सुभृतं चार्व् इन्दुः ॥ ९ ०९७ २४
अर्वाँ इव श्रवसे सातिम् अच्छेन्द्रस्य वायोर् अभि वीतिम् अर्ष ।
स नः सहस्रा बृहतीर् इषो दा भवा सोम द्रविणोवित् पुनानः ॥ ९ ०९७ २५
देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ॥ ९ ०९७ २६
एवा देव देवताति पवस्व महे सोम प्सरसे देवपानः ।
महश् चिद् धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ॥ ९ ०९७ २७
अश्वो नो क्रदो वृषभिर् युजानः सिंहो न भीमो मनसो जवीयान् ।
अर्वाचीनैः पथिभिर् ये रजिष्ठा आ पवस्व सौमनसं न इन्दो ॥ ९ ०९७ २८
शतं धारा देवजाता असृग्रन् सहस्रम् एनाः कवयो मृजन्ति ।
इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥ ९ ०९७ २९
दिवो न सर्गा असस्रृग्रम् अह्नां राजा न मित्रम् प्र मिनाति धीरः ।
पितुर् न पुत्रः क्रतुभिर् यतान आ पवस्व विशे अस्या अजीतिम् ॥ ९ ०९७ ३०
प्र ते धारा मधुमतीर् असृग्रन् वारान् यत् पूतो अत्येष्य् अव्यान् ।
पवमान पवसे धाम गोनां जज्ञानः सूर्यम् अपिन्वो अर्कैः ॥ ९ ०९७ ३१
कनिक्रदद् अनु पन्थाम् ऋतस्य शुक्रो वि भास्य् अमृतस्य धाम ।
स इन्द्राय पवसे मत्सरवान् हिन्वानो वाचम् मतिभिः कवीनाम् ॥ ९ ०९७ ३२
दिव्यः सुपर्णो ऽव चक्षि सोम पिन्वन् धाराः कर्मणा देववीतौ ।
एन्दो विश कलशं सोमधानं क्रन्दन् इहि सूर्यस्योप रश्मिम् ॥ ९ ०९७ ३३
तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिम् ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिम् पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ९ ०९७ ३४
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुतः पूयते अज्यमानः सोमे अर्कास् त्रिष्टुभः सं नवन्ते ॥ ९ ०९७ ३५
एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रम् आ विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ॥ ९ ०९७ ३६
आ जागृविर् विप्र ऋता मतीनां सोमः पुनानो असदच् चमूषु ।

सपन्ति यम् मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ १ ०१७ ३७
स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः ।
प्रिया चिद् यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥ १ ०१७ ३८
स वर्धिता वधनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिम् उष्णन् ॥ १ ०१७ ३९
अक्रान् समुद्रः प्रथमे विधर्मञ् जनयन् प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे सुवान इन्दुः ॥ १ ०१७ ४०
महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत देवान् ।
अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर् इन्दुः ॥ १ ०१७ ४१
मत्सि वायुम् इष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतम् मत्सि देवान् मत्सि द्यावापृथिवी देव सोम ॥ १ ०१७ ४२
ऋजुः पवस्व वृजिनस्य हन्तापामीवाम् बाधमानो मृधश् च ।
अभिश्रीणन् पयः पयसाभि गोनाम् इन्द्रस्य त्वं तव वयं सखायः ॥ १ ०१७ ४३
मध्वः सूदम् पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च ।
स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात् ॥ १ ०१७ ४४
सोमः सुतो धारयात्यो न हित्वा सिन्धुर् न निम्नम् अभि वाज्य् अक्षाः ।
आ योनिं वन्यम् असदत् पुनानः सम् इन्दुर् गोभिर् असरत् सम् अद्भिः ॥ १ ०१७ ४५
एष स्य ते पवत इन्द्र सोमश् चमूषु धीर उशते तवस्वान् ।
स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयताम् असर्जि ॥ १ ०१७ ४६
एष प्रत्नेन वयसा पुनानस् तिरो वपाँसि दुहितुर् दधानः ।
वसानः शर्म त्रिवरूथम् अप्सु होतेव याति समनेषु रेभन् ॥ १ ०१७ ४७
नू नस् त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः ।
अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥ १ ०१७ ४८
अभि वायुं वीत्य् अर्षा गृणानो ऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठाम् अभीन्द्रं वृषणं वज्रबाहुम् ॥ १ ०१७ ४९
अभि वस्त्रा सुवसनान्य् अर्षाभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याभ्य् अश्वान् रथिनो देव सोम ॥ १ ०१७ ५०

अभी नो॑ अर्ष दि॒व्या वसू॑न्य् अ॒भि विश्वा॑ पार्थि॒वा पू॒यमा॑नः ।
अ॒भि येन॒ द्रवि॑णम् अ॒श्नवा॑मा॒भ्य् आर्षे॑यं ज॒मद॑ग्नि॒वन् नः॑ ॥ १ ०९७ ५१
अ॒या प॒वा प॑वस्वै॒ना वसू॑नि मा॒श्वत्व इ॑न्दो सर॑सि॒ प्र ध॑न्व ।
ब्रध्न॑श् चि॒द् अत्र॒ वातो॒ न जू॒तः पु॑रुमे॒धश् चि॒त् तक॑वे॒ नर॑ं दात् ॥ १ ०९७ ५२
उ॒त न॑ ए॒ना प॑व॒या प॑वस्वाधि॑ श्रु॒ते श्र॒वाय्य॑स्य॒ तीर्थे॑ ।
ष॒ष्टिं स॒हस्रा॑ नैगु॒तो वसू॑नि वृ॒क्षं न प॒क्वं धू॑नव॒द् रणा॑य ॥ १ ०९७ ५३
महि॒मे अ॑स्य वृ॒षना॑म॒ शुषे॑ मा॒श्वत्वे॑ वा पृ॒शने॑ वा वधत्रे ।
अस्वा॑पयन् नि॒गुत॑: स्ने॒हय॑च् चापामि॒त्रा॑ अपा॑चितो॒ अचे॑तः ॥ १ ०९७ ५४
सं त्री प॒वित्रा॑ वित॒तान्य् ए॒ष्य् अन्व् एक॑ं धावसि पू॒यमा॑नः ।
अ॒सि॒ भगो॑ असि॑ दात्र॒स्य॑ दा॒तासि॑ म॒घवा॑ म॒घव॑द्भ्य इन्दो ॥ १ ०९७ ५५
ए॒ष वि॒श्ववित् प॑वते मनी॒षी सोमो॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॑ ।
द्र॒प्सा॑ ईरय॑न् वि॒दथे॑ष्व् इन्दु॒र् वि वा॒रम् अव्य॑ं स॒मया॑ति॑ याति ॥ १ ०९७ ५६
इन्दु॑ं रिहन्ति महि॒षा अद॑ब्धाः प॒दे रे॑भन्ति क॒वयो॒ न गृ॒ध्राः॑ ।
हि॒न्वन्ति॒ धीरा॑ द॒शभि॑: क्षि॒पाभि॑: सम् अ॑ञ्जते रू॒पम् अ॒पां रसे॑न ॥ १ ०९७ ५७
त्वया॑ व॒यम् पव॑मानेन सोम भरे॑ कृ॒तं वि चि॑नुयाम शश्वत् ।
तन् नो॑ मि॒त्रो व॑रु॒णो मामह॑न्ताम् अदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः ॥ १ ०९७ ५८

(८१०)

अ॒भि नो॑ वाज॒सात॑मं र॒यिम् अ॑र्ष पुरु॒स्पृह॑म् ।
इन्दो॑ स॒हस्र॑भर्णसं तुविद्यु॒म्नं वि॑श्वास॒हम् ॥ १ ०९८ ०१
परि॒ ष्य सु॑वा॒नो अ॒व्ययं॑ रथे॒ न व॑मा॑व्यत ।
इन्दु॑र् अ॒भि द्रुणा॑ हि॒तो हि॑या॒नो धारा॑भिर् अक्षाः ॥ १ ०९८ ०२
परि॒ ष्य सु॑वा॒नो अ॑क्षा इन्दु॒र् अव्ये॒ मद॑च्युतः ।
धारा॒ य ऊ॒र्ध्वो अ॑ध्व॒रे भ्रा॒जा नैति॑ गव्ययुः ॥ १ ०९८ ०३
स हि त्वं दे॑व॒ शश्व॑ते॒ वसु॒ मर्ता॑य दा॒शुषे॑ ।
इन्दो॑ सहस्रिणं॑ र॒यिं श॒तात्मा॑नं विवाससि ॥ १ ०९८ ०४
व॒यं ते॑ अ॒स्य वृ॑त्रहन् वसो॒ वस्व॑: पुरु॒स्पृह॑: ।

नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥ १ ०९८ ०५
द्विर् यम् पञ्च स्वयशसं स्वसारो अद्रिसंहतम् ।
प्रियम् इन्द्रस्य काम्यम् प्रस्नापयन्त्य् ऊर्मिणम् ॥ १ ०९८ ०६
परि त्यं हर्यतं हरिम् बभ्रुम् पुनन्ति वारेण ।
यो देवान् विश्वाꣳ इत् परि मदेन सह गच्छति ॥ १ ०९८ ०७
अस्य वो ह्य् अवसा पान्तो दक्षसाधनम् ।
यः सूरिषु श्रवो बृहद् दधे स्व १ र् ण हर्यतः ॥ १ ०९८ ०८
स वां यज्ञेषु मानवी इन्दुर् जनिष्ट रोदसी ।
देवो देवी गिरिष्ठा अस्रेधन् तं तुविष्वणि ॥ १ ०९८ ०९
इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
नरे च दक्षिणावते देवाय सदनासदे ॥ १ ०९८ १०
ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।
अपप्रोथन्तः सनुतर् हुरश्चितः प्रातस् ताꣳ अप्रचेतसः ॥ १ ०९८ ११
तं सखायः पुरोरुचं यूयं वयं च सूरयः ।
अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥ १ ०९८ १२

(८११)

आ हर्यताय धृष्णवे धनुस् तन्वन्ति पौंस्यम् ।
शुक्रां वयन्त्य् असुराय निर्णिजं विपाम् अग्रे महीयुवः ॥ १ ०९९ ०१
अध क्षपा परिष्कृतो वाजाꣳ अभि प्र गाहते ।
यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥ १ ०९९ ०२
तम् अस्य मर्जयामसि मदो य इन्द्रपातमः ।
यं गाव आसभिर् दधुः पुरा नूनं च सूरयः ॥ १ ०९९ ०३
तं गाथया पुराण्या पुनानम् अभ्य् अनूषत ।
उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥ १ ०९९ ०४
तम् उक्षमाणम् अव्यये वारे पुनन्ति धर्णसिम् ।
दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥ १ ०९९ ०५

स पुनानो मदिन्तमः सोमश् चमूषु सीदति ।
पशौ न रेत आदधत् पतिर् वचस्यते धियः ॥ १ ०९१ ०६
स मृज्यते सुकर्मभिर् देवो देवेभ्यः सुतः ।
विदे यद् आसु संददिर् महीर् अपो वि गाहते ॥ १ ०९१ ०७
सुत इन्दो पवित्र आ नृभिर् यतो वि नीयसे ।
इन्द्राय मत्सरिन्तमश् चमूष्व् आ नि षीदसि ॥ १ ०९१ ०८

(८१२)

अभी नवन्ते अद्रुहः प्रियम् इन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥ १ १०० ०१
पुनान इन्दव् आ भर सोम द्विबर्हसं रयिम् ।
त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥ १ १०० ०२
त्वं धियम् मनोयुजं सृजा वृष्टिं न तन्यतुः ।
त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥ १ १०० ०३
परि ते जिग्युषो यथा धारा सुतस्य धावति ।
रंहमाणा व्य् अ १ व्ययं वारं वाजीव सानसिः ॥ १ १०० ०४
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया ।
इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥ १ १०० ०५
पवस्व वाजसातमः पवित्रे धारया सुतः ।
इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ १ १०० ०६
त्वां रिहन्ति मातरो हरिम् पवित्रे अद्रुहः ।
वत्सं जातं न धेनवः पवमान विधर्मणि ॥ १ १०० ०७
पवमान महि श्रवश् चित्रेभिर् यासि रश्मिभिः ।
शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥ १ १०० ०८
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
प्रति द्रापिम् अमुञ्चथाः पवमान महित्वना ॥ १ १०० ०९

(८१३)

पुरोजितीं वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयम् ॥ ९ १०१ ०१
यो धारया पावकया परिप्रस्यन्दते सुतः ।
इन्दुर् अश्वो न कृत्व्यः ॥ ९ १०१ ०२
तं दुरोषम् अभी नरः सोमं विश्वाच्या धिया ।
यज्ञं हिन्वन्त्य् अद्रिभिः ॥ ९ १०१ ०३
सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ९ १०१ ०४
इन्दुर् इन्द्राय पवत इति देवासो अब्रुवन् ।
वाचस् पतिर् मखस्यते विश्वस्येशान ओजसा ॥ ९ १०१ ०५
सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
सोमः पती रयीणां सखेन्द्रस्य दिवे-दिवे ॥ ९ १०१ ०६
अयम् पूषा रयिर् भगः सोमः पुनानो अर्षति ।
पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥ ९ १०१ ०७
सम् उ प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ९ १०१ ०८
य ओजिष्ठस् तम् आ भर पवमान श्रवाय्यम् ।
यः पञ्च चर्षणीर् अभि रयिं येन वनामहै ॥ ९ १०१ ०९
सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥ ९ १०१ १०
सुष्वाणासो व्य् अद्रिभिश् चिताना गोर् अधि त्वचि ।
इषम् अस्मभ्यम् अभितः सम् अस्वरन् वसुविदः ॥ ९ १०१ ११
एते पूता विपश्चितः सोमासो दध्याशिरः ।
सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ ९ १०१ १२
प्र सुन्वानस्यान्धसो मर्तो न वृत तद् वचः ।
अप श्वानम् अराधस हता मखं न भृगवः ॥ ९ १०१ १३

आ जामिर् अत्के अव्यत भुजे न पुत्र ओण्योः ।
सरज् जारो न योषणां वरो न योनिम् आसदम् ॥ ९ १०१ १४
स वीरो दक्षसाधनो वि यस् तस्तम्भ रोदसी ।
हरिः पवित्रे अव्यत वेधा न योनिम् आसदम् ॥ ९ १०१ १५
अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।
कनिक्रदद् वृषा हरिर् इन्द्रस्याभ्य् एति निष्कृतम् ॥ ९ १०१ १६

(८१४)

क्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।
विश्वा परि प्रिया भुवद् अध द्विता ॥ ९ १०२ ०१
उप त्रितस्य पाष्यो ३ र् अभक्त यद् गुहा पदम् ।
यज्ञस्य सप्त धामभिर् अध प्रियम् ॥ ९ १०२ ०२
त्रीणि त्रितस्य धारया पृष्ठेष्व् एरया रयिम् ।
मिमीते अस्य योजना वि सुक्रतुः ॥ ९ १०२ ०३
जज्ञानं सप्त मातरो वेधाम् अशासत श्रिये ।
अयं ध्रुवो रयीणां चिकेत यत् ॥ ९ १०२ ०४
अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः ।
स्पार्हा भवन्ति रन्तयो जुषन्त यत् ॥ ९ १०२ ०५
यम् ई गर्भम् ऋतावृधो दृशे चारुम् अजीजनन् ।
कविम् मंहिष्ठम् अध्वरे पुरुस्पृहम् ॥ ९ १०२ ०६
समीचीने अभि त्मना यह्वी ऋतस्य मातरा ।
तन्वाना यज्ञम् आनुषग् यद् अञ्जते ॥ ९ १०२ ०७
कृत्वा शुक्रेभिर् अक्षभिर् ऋणोर् अप व्रजं दिवः ।
हिन्वन्न् ऋतस्य दीधितिम् प्राध्वरे ॥ ९ १०२ ०८

(८१५)

प्र पुनानाय वेधसे सोमाय वच उद्यतम् ।
भृतिं न भरा मतिभिर् जुजोषते ॥ ९ १०३ ०१
परि वाराण्य् अव्यया गोभिर् अञ्जानो अर्षति ।
त्री षधस्था पुनानः कृणुते हरिः ॥ ९ १०३ ०२
परि कोशम् मधुश्चुतम् अव्यये वारे अर्षति ।
अभि वाणीर् ऋषीणां सप्त नूषत ॥ ९ १०३ ०३
परि णेता मतीनां विश्वदेवो अदाभ्यः ।
सोमः पुनानश् चम्वोर् विशद् धरिः ॥ ९ १०३ ०४
परि दैवीर् अनु स्वधा इन्द्रेण याहि सरथम् ।
पुनानो वाघद् वाघद्भिर् अमर्त्यः ॥ ९ १०३ ०५
परि सप्तिर् न वाजयुर् देवो देवेभ्यः सुतः ।
व्यानशिः पवमानो वि धावति ॥ ९ १०३ ०६

(८१६)

सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ९ १०४ ०१
सम् ईं वत्सं न मातृभिः सृजता गयसाधनम् ।
देवाव्य ं म् मदम् अभि द्विशवसम् ॥ ९ १०४ ०२
पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
यथा मित्राय वरुणाय शंतमः ॥ ९ १०४ ०३
अस्मभ्यं त्वा वसुविदम् अभि वाणीर् अनूषत ।
गोभिष् टे वर्णम् अभि वासयामसि ॥ ९ १०४ ०४
स नो मदानाम् पत इन्दो देवप्सरा असि ।
सखेव सख्ये गातुवित्तमो भव ॥ ९ १०४ ०५
सनेमि कृध्य् अ ं स्मद् आ रक्षसं कं चिद् अत्रिणम् ।
अपादेवं द्वयुम् अंहो युयोधि नः ॥ ९ १०४ ०६

(८१७)

तं वः सखायो मदाय पुनानम् अभि गायत ।
शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः ॥ ९ १०५ ०१
सं वत्स इव मातृभिर् इन्दुर् हिन्वानो अज्यते ।
देवावीर् मदो मतिभिः परिष्कृतः ॥ ९ १०५ ०२
अयं दक्षाय साधनो ऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तमः सुतः ॥ ९ १०५ ०३
गोमन् न इन्दो अश्ववत् सुतः सुदक्ष धन्व ।
शुचिं ते वर्णम् अधि गोषु दीधरम् ॥ ९ १०५ ०४
स नो हरीणाम् पत इन्दो देवप्सरस्तमः ।
सखेव सख्ये नर्यो रुचे भव ॥ ९ १०५ ०५
सनेमि त्वम् अस्मद् आꣳ अदेवं कं चिद् अत्रिणम् ।
साह्वाꣳ इन्दो परि बाधो अप द्वयुम् ॥ ९ १०५ ०६

(८१८)

इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी जातास इन्दवः स्वर्विदः ॥ ९ १०६ ०१
अयम् भराय सानसिर् इन्द्राय पवते सुतः ।
सोमो जैत्रस्य चेतति यथा विदे ॥ ९ १०६ ०२
अस्येद् इन्द्रो मदेष्व् आ ग्राभं गृभ्णीत सानसिम् ।
वज्रं च वृषणम् भरत् सम् अप्सुजित् ॥ ९ १०६ ०३
प्र धन्वा सोम जागृविर् इन्द्रायेन्दो परि स्रव ।
द्युमन्तं शुष्मम् आ भरा स्वर्विदम् ॥ ९ १०६ ०४
इन्द्राय वृषणम् मदम् पवस्व विश्वदर्शतः ।
सहस्रयामा पथिकृद् विचक्षणः ॥ ९ १०६ ०५
अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः ।

सहस्रं याहि पथिभिः कनिक्रदत् ॥ ९ १०६ ०६
पवस्व देववीतय इन्दो धाराभिर् ओजसा ।
आ कलशम् मधुमान् सोम नः सदः ॥ ९ १०६ ०७
तव द्रप्सा उदप्रुत इन्द्रम् मदाय वावृधुः ।
त्वां देवासो अमृताय कम् पपुः ॥ ९ १०६ ०८
आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ९ १०६ ०९
सोमः पुनान ऊर्मिणाव्यो वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥ ९ १०६ १०
धीभिर् हिन्वन्ति वाजिनं वने क्रीळन्तम् अत्यविम् ।
अभि त्रिपृष्ठम् मतयः सम् अस्वरन् ॥ ९ १०६ ११
असर्जि कलशाँ अभि मीळ्हे सप्तिर् न वाजयुः ।
पुनानो वाचं जनयन्न् असिष्यदत् ॥ ९ १०६ १२
पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ९ १०६ १३
अया पवस्व देवयुर् मधोर् धारा असृक्षत ।
रेभन् पवित्रम् पर्य् एषि विश्वतः ॥ ९ १०६ १४

(८११)

परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्व् अ १ न्तर् आ सुषाव सोमम् अद्रिभिः ॥ ९ १०७ ०१
नूनम् पुनानो ऽविभिः परि स्रवादब्धः सुरभिन्तरः ।
सुते चित् त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिर् उत्तरम् ॥ ९ १०७ ०२
परि सुवानश् चक्षसे देवमादनः क्रतुर् इन्दुर् विचक्षणः ॥ ९ १०७ ०३
पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिम् ऋतस्य सीदस्य् उत्सो देव हिरण्ययः ॥ ९ १०७ ०४
दुहान ऊधर् दिव्यम् मधु प्रियम् प्रत्नं सधस्थम् आसदत् ।

आपृच्छ्यं धरुणं वाज्य् अर्षति नृभिर् धूतो विचक्षणः ॥ ९ १०७ ०५
पुनानः सोम जागृविर् अव्यो वारे परि प्रियः ।
त्वं विप्रो अभवो ऽङ्गिरस्तमो मध्वा यज्ञम् मिमिक्ष नः ॥ ९ १०७ ०६
सोमो मीढ्वान् पवते गातुवित्तम ऋषिर् विप्रो विचक्षणः ।
त्वं कविर् अभवो देववीतम आ सूर्यं रोहयो दिवि ॥ ९ १०७ ०७
सोम उ षुवाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ९ १०७ ०८
अनूपे गोमान् गोभिर् अक्षाः सोमो दुग्धाभिर् अक्षाः ।
समुद्रं न संवरणान्य् अग्मन् मन्दी मदाय तोशते ॥ ९ १०७ ०९
आ सोम सुवानो अद्रिभिस् तिरो वाराण्य् अव्यया ।
जनो न पुरि चम्वोर् विशद् धरिः सदो वनेषु दधिषे ॥ ९ १०७ १०
स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर् न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर् ऋङ्कभिः ॥ ९ १०७ ११
प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविर् अच्छा कोशम् मधुश्चुतम् ॥ ९ १०७ १२
आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर् न मर्ज्यः ।
तम् ईं हिन्वन्त्य् अपसो यथा रथं नदीष्व् आ गभस्त्योः ॥ ९ १०७ १३
अभि सोमास आयवः पवन्ते मद्यम् मदम् ।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥ ९ १०७ १४
तरत् समुद्रम् पवमान ऊर्मिणा राजा देव ऋतम् बृहत् ।
अर्षन् मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतम् बृहत् ॥ ९ १०७ १५
नृभिर् येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥ ९ १०७ १६
इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्य् अव्यम् अर्षति तम् ईं मृजन्त्य् आयवः ॥ ९ १०७ १७
पुनानश् चमू जनयन् मतिं कविः सोमो देवेषु रण्यति ।
अपो वसानः परि गोभिर् उत्तरः सीदन् वनेष्व् अव्यत ॥ ९ १०७ १८
तवाहं सोम रारण सख्य इन्दो दिवे-दिवे ।
पुरूणि बभ्रो नि चरन्ति माम् अव परिधीर् अति ताꣳ इहि ॥ ९ १०७ १९

उताहं नक्तम् उत सोम ते दिवा सख्याय बभ्र ऊधनि ।
घृणा तपन्तम् अति सूर्यम् परः शकुना इव पप्तिम ॥ ९ १०७ २०
मृज्यमानः सुहस्त्य समुद्रे वाचम् इन्वसि ।
रयिम् पिशङ्गम् बहुलम् पुरुस्पृहम् पवमानाभ्य् अर्षसि ॥ ९ १०७ २१
मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।
देवानां सोम पवमान निष्कृतं गोभिर् अञ्जानो अर्षसि ॥ ९ १०७ २२
पवस्व वाजसातये ऽभि विश्वानि काव्या ।
त्वं समुद्रम् प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥ ९ १०७ २३
स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।
त्वां विप्रासो मतिभिर् विचक्षण शुम्भं हिन्वन्ति धीतिभिः ॥ ९ १०७ २४
पवमाना असृक्षत पवित्रम् अति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधाम् अभि प्रयांसि च ॥ ९ १०७ २५
अपो वसानः परि कोशम् अर्षतीन्दुर् हियानः सोतृभिः ।
जनयञ् ज्योतिर् मन्दना अवीवशद् गाः कृण्वानो न निर्णिजम् ॥ ९ १०७ २६

(८२०)

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ ९ १०८ ०१
यस्य ते पीत्वा वृषभो वृषायते ऽस्य पीता स्वर्विदः ।
स सुप्रकेतो अभ्य् अक्रमीद् इषो ऽच्छा वाजं नैतशः ॥ ९ १०८ ०२
त्वं ह्य अ ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयः ॥ ९ १०८ ०३
येना नवग्वो दध्यङ्ङ् अपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्य् आनशुः ॥ ९ १०८ ०४
एष स्य धारया सुतो ऽव्यो वारेभिः पवते मदिन्तमः ।
क्रीळन्न् ऊर्मिर् अपाम् इव ॥ ९ १०८ ०५
य उस्रिया अप्या अन्तर् अश्मनो निर् गा अकृन्तद् ओजसा ।

अभि व्रजं तन्निषे गव्यम् अभ्यं वर्मीव धृष्णव् आ रुज ॥ ९ १०८ ०६
आ सोता परि षिञ्चताश्वं न स्तोमम् अतुरं रजस्तुरम् ।
वनक्रक्षम् उदप्रुतम् ॥ ९ १०८ ०७
सहस्रधारं वृषभम् पयोवृधम् प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतम् बृहत् ॥ ९ १०८ ०८
अभि द्युम्नम् बृहद् यश इषस् पते दिदीहि देव देवयुः ।
वि कोशम् मध्यमं युव ॥ ९ १०८ ०९
आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर् न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिम् अपां जिन्वा गविष्टये धियः ॥ ९ १०८ १०
एतम् उ त्यम् मदच्युतं सहस्रधारं वृषभं दिवो दुहुः ।
विश्वा वसूनि बिभ्रतम् ॥ ९ १०८ ११
वृषा वि जज्ञे जनयन्न् अमर्त्यः प्रतपन् ज्योतिषा तमः ।
स सुष्टुतः कविभिर् निर्णिजं दधे त्रिधात्व् अस्य दंससा ॥ ९ १०८ १२
स सुन्वे यो वसूनां यो रायाम् आनिता य इळानाम् ।
सोमो यः सुक्षितीनाम् ॥ ९ १०८ १३
यस्य न इन्द्रः पिबाद् यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रम् अवसे महे ॥ ९ १०८ १४
इन्द्राय सोम पातवे नृभिर् यतः स्वायुधो मदिन्तमः ।
पवस्व मधुमत्तमः ॥ ९ १०८ १५
इन्द्रस्य हार्दि सोमधानम् आ विश समुद्रम् इव सिन्धवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥ ९ १०८ १६

(८२१)

परि प्र धन्वेन्द्राय सोम स्वादुर् मित्राय पूष्णे भगाय ॥ ९ १०९ ०१
इन्द्रस् ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥ ९ १०९ ०२
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ ९ १०९ ०३
पवस्व सोम महान् समुद्रः पिता देवानां विश्वाभि धाम ॥ ९ १०९ ०४

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥ ९ १०९ ०५
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन् वाजी पवस्व ॥ ९ १०९ ०६
पवस्व सोम द्युम्नी सुधारो महाम् अवीनाम् अनु पूर्व्यः ॥ ९ १०९ ०७
नृभिर् येमानो जज्ञानः पूतः क्षरद् विश्वानि मन्द्रः स्वर्वित् ॥ ९ १०९ ०८
इन्दुः पुनानः प्रजाम् उराणः करद् विश्वानि द्रविणानि नः ॥ ९ १०९ ०९
पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥ ९ १०९ १०
तं ते सोतारो रसम् मदाय पुनन्ति सोमम् महे द्युम्नाय ॥ ९ १०९ ११
शिशुं जज्ञानं हरिम् मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ ९ १०९ १२
इन्दुः पविष्ट चारुर् मदायापाम् उपस्थे कविर् भगाय ॥ ९ १०९ १३
बिभर्ति चार्व् इन्द्रस्य नाम येन विश्वानि वृत्रा जघान ॥ ९ १०९ १४
पिबन्त्य् अस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ॥ ९ १०९ १५
प्र सुवानो अक्षाः सहस्रधारस् तिरः पवित्रं वि वारम् अव्यम् ॥ ९ १०९ १६
स वाज्य् अक्षाः सहस्ररेता अद्भिर् मृजानो गोभिः श्रीणानः ॥ ९ १०९ १७
प्र सोम याहीन्द्रस्य कुक्षा नृभिर् येमानो अद्रिभिः सुतः ॥ ९ १०९ १८
असर्जि वाजी तिरः पवित्रम् इन्द्राय सोमः सहस्रधारः ॥ ९ १०९ १९
अञ्जन्त्य् एनम् मध्वो रसेनेन्द्राय वृष्ण इन्दुम् मदाय ॥ ९ १०९ २०
देवेभ्यस् त्वा वृथा पाजस ऽपो वसानं हरिम् मृजन्ति ॥ ९ १०९ २१
इन्दुर् इन्द्राय तोशते नि तोशते श्रीणन्न् उग्रो रिणन्न् अपः ॥ ९ १०९ २२

(८२२)

पर्य् ऊ षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस् तरध्या ऋणया न ईयसे ॥ ९ ११० ०१
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे ॥ ९ ११० ०२
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरंध्या ॥ ९ ११० ०३
अजीजनो अमृत मर्त्येष्व् आँ ऋतस्य धर्मन्न् अमृतस्य चारुणः ।

सदासरो वाजम् अच्छा सनिष्यदत् ॥ ९ ११० ०४
अभ्य्-अभि हि श्रवसा ततर्दिथोत्सं न कं चिज् जनपानम् अक्षितम् ।
शर्याभिर् न भरमाणो गभस्त्योः ॥ ९ ११० ०५
आद् ईं के चित् पश्यमानास आप्यं वसुरुचो दिव्या अभ्य् अनूषत ।
वारं न देवः सविता व्य् ऊर्णुते ॥ ९ ११० ०६
त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ॥ ९ ११० ०७
दिवः पीयूषम् पूर्व्यं यद् उक्थ्यम् महो गाहाद् दिव आ निर् अधुक्षत ।
इन्द्रम् अभि जायमानं सम् अस्वरन् ॥ ९ ११० ०८
अध यद् इमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निष्ठा वृषभो वि तिष्ठसे ॥ ९ ११० ०९
सोमः पुनानो अव्यये वारे शिशुर् न क्रीळन् पवमानो अक्षाः ।
सहस्रधारः शतवाज इन्दुः ॥ ९ ११० १०
एष पुनानो मधुमाँ ऋतावेन्द्रायेन्दुः पवते स्वादुर् ऊर्मिः ।
वाजसनिर् वरिवोविद् वयोधाः ॥ ९ ११० ११
स पवस्व सहमानः पृतन्यून् सेधन् रक्षांस्य् अप दुर्गहाणि ।
स्वायुधः सासह्वान् सोम शत्रून् ॥ ९ ११० १२

(८२३)

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।
धारा सुतस्य रोचते पुनानो अरुषो हरिः ।
विश्वा यद् रूपा परियात्य् ऋङ्कभिः सप्तास्येभिर् ऋङ्कभिः ॥ ९ १११ ०१
त्वं त्यत् पणीनां विदो वसु सम् मातृभिर् मर्जयसि स्व आ दम ऋतस्य धीतिभिर् दमे ।
परावतो न साम तद् यत्रा रणन्ति धीतयः ।
त्रिधातुभिर् अरुषीभिर् वयो दधे रोचमानो वयो दधे ॥ ९ १११ ०२
पूर्वाम् अनु प्रदिशं याति चेकितत् सं रश्मिभिर् यतते दर्शतो रथो ।

दैव्यो॑ दर्श॒तो रथः॑ ।
अग्म॑न्न् उ॒क्थानि॒ पौंस्येन्द्रं॑ जैत्रा॑य हर्षयन् ।
वज्र॑श् च॒ यद् भव॑थो अन॑पच्युता स॒मत्स्व् अन॑पच्युता ॥ ९ १११ ०३

(८२४)

नाना॒नं वा उ॑ नो धियो॒ वि व्र॒तानि॒ जना॑नाम् ।
तक्षा॑ रि॒ष्टं रु॒तम् भि॒षग् ब्रह्मा॑ सु॒न्वन्त॑म् इच्छ॒तीन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११२ ०१
जर॑तीभि॒र् ओष॑धीभिः प॒र्णेभि॑: शकु॒नाना॑म् ।
का॒मा॒रो अश्म॑भि॒र् द्युभि॒र् हिर॑ण्यवन्तम् इच्छ॒तीन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११२ ०२
का॒रुर् अ॒हं त॒तो भि॒षग् उ॑पलप्र॒क्षिणी॑ न॒ना ।
नाना॑धियो वसू॒यवो ऽनु॒ गा इ॑व तस्थि॒मेन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११२ ०३
अश्वो॒ वोळ्हा॑ सु॒खं रथं॑ ह॒सना॑म् उ॑पम॒न्त्रिण॑: ।
शेपो॒ रोम॑ण्वन्तौ भे॒दौ वार् इन् म॒ण्डूक॑ इच्छ॒तीन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११२ ०४

(८२५)

श॒र्य॒णाव॑ति॒ सोम॒म् इन्द्र॑: पिबतु वृ॒त्रहा ।
बलं॑ दधा॒न आ॒त्मनि॑ करि॒ष्यन् वी॒र्यम् म॒हद् इन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११३ ०१
आ प॑वस्व दिशाम् पत आर्जी॒कात् सो॑म मीढ्वः ।
ऋ॒तवा॑केन॒ स॒त्येन॑ श्र॒द्धया॒ तप॑सा सुत इन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११३ ०२
प॒र्ज॒न्य॑वृ॒द्धम् म॒हि॒षं तं सूर्य॑स्य दुहि॒ताभ॑रत् ।
तं ग॑न्ध॒र्वाः प्रत्य् अ॑गृभ्णन् तं सोमे॑ रश्म् आद॑धुर् इन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११३ ०३
ऋ॒तं वद॑न्न् ऋतद्युम्न स॒त्यं वद॑न् सत्यकर्मन् ।
श्र॒द्धां वद॑न् सोम राजन् धा॒त्रा सो॑म॒ परि॑ष्कृत इन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११३ ०४
स॒त्यमु॒ग्रस्य॑ बृ॒हतः॑ सं स्र॑वन्ति संस्र॒वाः ।
सं य॑न्ति र॒सिनो॒ रसाः॑ पुना॒नो ब्रह्म॑णा ह॒र इन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ९ ११३ ०५
यत्र॑ ब्र॒ह्मा प॑वमान छन्द॒स्या॒३॑ वाच॑ं वद॑न् ।

ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्न् इन्द्रायेन्दो परि स्रव ॥ ९ ११३ ०६
यत्र ज्योतिर् अजस्रं यस्मिंल्लोके स्वर् हितम् ।
तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ॥ ९ ११३ ०७
यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर् यद्धतीर् आपस् तत्र माम् अमृतं कृधीन्द्रायेन्दो परि स्रव ॥ ९ ११३ ०८
यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस् तत्र माम् अमृतं कृधीन्द्रायेन्दो परि स्रव ॥ ९ ११३ ०९
यत्र कामा निकामाश् च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्तिश् च तत्र माम् अमृतं कृधीन्द्रायेन्दो परि स्रव ॥ ९ ११३ १०
यत्रानन्दाश् च मोदाश् च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास् तत्र माम् अमृतं कृधीन्द्रायेन्दो परि स्रव ॥ ९ ११३ ११

(८२६)

य इन्दोः पवमानस्यानु धामान्य् अक्रमीत् ।
तम् आहुः सुप्रजा इति यस् ते सोमाविधन् मन इन्द्रायेन्दो परि स्रव ॥ ९ ११४ ०१
ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन् गिरः ।
सोम नमस्य राजानं यो जज्ञे वीरुधाम् पतिर् इन्द्रायेन्दो परि स्रव ॥ ९ ११४ ०२
सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ॥ ९ ११४ ०३
यत् ते राजञ् छृतं हविस् तेन सोमाभि रक्ष नः ।
अरातीवा मा नस् तारीन् मो च नः किं चनाममद् इन्द्रायेन्दो परि स्रव ॥ ९ ११४ ०४